नां चित्तस्य परमागतः ॥ न्यन्काचित्तं महायोगी ब्रह्मभूतो न भूवह ॥ ४१ ॥ शांतियोगं समाश्रित्य ब्रह्मलोकं जे
गामह ॥ तत्रैव संस्थितो भूत्वा गरीशभजने रतः ॥ ४२ ॥ प्रियव्रतः स्वयं राजा पालयामास मेदिनीम् ॥ धर्मे
णानिमिदानेन न्यागेन यशआवर्जयन् ॥ ४३ ॥ स्वस्वधर्मरताः सर्वे जनाः वरणिप्रमान्विताः ॥ मुदिताः सत्यशी
लाश्च राज्यं स्थिते प्रियव्रते ॥ ४४ ॥ ० ॥ इति श्रीमदांत्ये० प्रियव्रतराज्यप्राप्तिर्नाम नवमोऽध्यायः ॥ ८ ॥ ०॥
मुद्गल उवाच ॥ प्रियव्रतस्य पुत्राश्च दशोत्पन्ना महौजसः ॥ तेजस्विनो धर्मशीलाश्चिरंजीवा बलवंतराः १ ॥
अग्नीध्रइध्मजिह्वश्च यज्ञबाहुस्तथा मखः ॥ वीरोहिरण्यरेताश्च घृतपृष्ठः सवनः परः ॥ २ ॥ मेधातिथि
र्वीतिहोत्रः कविः पितृसमाबभुः ॥ कविः सवनवीरौ च नराज्ये दधिरे मतिम् ॥ ३ ॥ सप्तद्वीपेश्वरास्तत्र स

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



कंकं लदेवत्वं संप्राप्तोसोगणाननः॥ तमाराध्य यत्नेन ततः क्षेमं भविष्यति॥ ३१॥ गुरोः शोगणराजं तं संपू
ज्य भक्तिभावतः॥ बभूवब्रह्मभूतश्च भक्त्यास्माकं पितामहः॥ ३२॥ तस्य पुत्राः समाख्याताः ब्रह्मविस्त
र्मिहेश्वराः॥ सूर्य्यश्चाक्तिश्चपंचैते तं समाराध्य भोगिनः॥ ३३॥ ततस्ते शांतिमत्यंतं प्राप्ता विश्वेश्वराः
सुत॥ ब्रह्मणश्च वयं पुत्रा भजामस्तं गणाधिपम्॥ ३४॥ ततो योगींद्रमुख्याश्च वयं जाताः प्रियव्रत॥
श्रीः ३३ सर्वज्ञानसमायुक्ता बंधहीना विशेषतः॥ ३५॥ तथा त्वमपि राजेंद्र गणेशं भज भावतः॥ तावतः
सुलभं सर्वं भविष्यति सदानघ॥ ३६॥ ततएकाक्षरं मंत्रं ददौ तस्मै महामुनिः॥ गणेशाराधनं सर्वं बो
धयामास यत्नतः॥ ३७॥ एतस्मिन्नंतरे तत्र ब्रह्मणा सहसागतः॥ स्वायंभुवो मनुस्सुस्तो दृष्ट्वा प्र
णतौ सुतौ॥ ३८॥ ब्रह्मणानोदितौ नित्यं पुनः पौत्रः प्रियव्रतः॥ मनुना सहराजर्षिर्ययौ स्वनगरं तदा॥ ३९॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पुत्रेषु राज्यमानीय स्थापयित्वा च शाश्वतम् ॥ पश्चाद्वनमाविश्य योगाभ्यासरतो भवत् ॥ २३ ॥ मुद्ग
ल उवाच ॥ नारदस्य वचः श्रुत्वा ऋषिर्नो राजसत्तमः ॥ उवाच तं मनोः पुत्रः प्रांजलिः प्रश्रयान्वितः ॥ २४ ॥
प्रियव्रत उवाच ॥ स्वामिन्निरामयं पृच्छामि वदमे त्वं महामते ॥ केनोपायेन योगीन्द्र ब्रह्मभूतो भवेन्नरः ॥
२५ ॥ नारद उवाच ॥ अत्र पुत्र प्रवक्ष्यामि ब्रह्मभूतपदप्रदम् ॥ मार्गं तं साध्यशांतिं च लभते मानव
वः स्वयम् ॥ २६ ॥ गणेशं योगरूपं तं ज्ञात्वा योगं ब्रह्मनायकम् ॥ ब्रह्मभूतो भवेज्जंतुः साधनेन महा
मते ॥ २७ ॥ गणशब्दः समूहस्य वाचकः परिकीर्तितः ॥ समूहा योगरूपाश्च बाह्यांतराद्यभेदतः ॥
२८ ॥ अन्नानां संकल्पानां वै समूहेभ्यः सुतः ॥ कथितं ब्रह्मवेदेयं देवं नानागणा स्मृताः ॥ २९ ॥
तेषां पतिं गणेशानं तं ज्ञात्वा योगिनः पुरा ॥ शांतिं प्राप्ताश्च शेषेण शांतियोगमयं परम् ॥ ३० ॥ अस्मा



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



तं विप्रबोधयस्वविधानतः॥ तथेति नारदस्तत्र ययौ प्रियव्रताश्रमे॥ तं दृष्ट्वा प्रियराजर्षिः प्रणनाम
कृतांजलिः॥ १५॥ स्वकीयाज्ञावसंपन्नमासनेवीक्ष्य संस्थितम्॥ तं जगाम महातेजा नारदो राजस
त्तमम्॥ १६॥ नारद उवाच॥ शृणु पुत्र महाभाग प्रियव्रत महामते॥ देहादि नश्वरं सर्वं त्वया ज्ञातं म
हाद्भुतम्॥ १७॥ तथापि नारदेहोयं मृगोस्मिभिः समन्वितः॥ नरदेहे कृतं कर्म तन्मूलं सफलं न
गतं॥ १८॥ सर्वेषामत्र रूपोयं नरदेहो न संशयः॥ तेषां योषरामन्यं कर्तव्यं देहधारिणा॥
१९॥ स्वधर्मपालनेनैव वर्णाश्रमविधानतः॥ देहिना कृतपुण्येन त्वेनविश्वं प्रयोधितम्॥ २०॥
पशादिभिस्तरांदेवं आदिभिश्चपैतृकम्॥ पुत्रोत्पादनमात्रेण मानुष्यं नाशमेष्यति॥ २१॥
अधुनाऽस्मात्पुरात्त्वं वनं कस्मात्समागतः॥ कुरुराज्यं महाभाग स्वधर्मनिरतो मुदा॥ २२॥

श्री:॥ ३२

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कुलेनतत् ॥६॥ शौनकउवाच ॥ कथंमुकुलविप्रेण कथितंतस्यधीमतः ॥ चरित्रंवदसर्वं मेयथा
दक्षेणसंश्रुतम् ॥७॥ सूतउवाच ॥ शापमोक्षितदक्षस्तुश्रुत्वानारदमुद्भवम् ॥ चरितंयोगरूपंस
मुकुलंपुनरब्रवीत् ॥८॥ दक्षउवाच ॥ धन्योत्रिर्यस्यपुत्रोवैगुणापत्यामहौजसः ॥ योगिनोयो
गदातारः श्रुतंतेषांचरित्रकम् ॥९॥ अधुनावदमेब्रह्मन्सृष्टिमार्गंपुरातनम् ॥ स्वायंभुवमनोः
पुत्रौचक्रतुःकिमहैजसौ ॥१०॥ सूतउवाच ॥ दक्षस्यवचनंश्रुत्वाहर्षयुक्तेनचेतसा ॥ जगादतं
महायोगीमुकुलःपरमार्थवित् ॥११॥ मुकुलउवाच ॥ स्वायंभुवमनोःपुत्रौसंजातौप्रजाकामिकौ
॥ प्रियव्रतोत्तानपादौनाम्नाख्यातौप्रजापते ॥१२॥ प्रियव्रतोवनंज्येष्ठोजगामसाधनेरतः ॥ दि
व्यादिनाद्वयंमत्वाभूत्सखिनोमनुस्तुतः ॥१३॥ जगामनारदमुनिस्तत्रसहसातंमनुर्जगौ ॥ पुत्रंप्रियव्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नेकुर्वतेनराः ॥ ८४ ॥ योगिभिर्देवगन्धर्वैः सिद्धैर्नागैश्च मानुषैः ॥ नानाजन्मैस्त[illegible]यादक्षसेवितंक्षेत्र
मुत्तमम् ॥ ८५ ॥ एतद्दत्तस्यमाहात्म्यं यः शृणोति नरोत्तमः ॥ पठति भवितातस्य सर्वसिद्धिर्न संशयः ॥
इति श्रीमदान्ये दत्तचरित्रं नामाष्टमोध्यायः ॥ ८ ॥ सूत उवाच ॥ दुर्वासाः शंकरस्यांशस्तत्तापपरमं
तपः ॥ सदुब्रह्मणि संजातो ब्रह्मभूतो महामुनिः ॥ १ ॥ तमतिक्रोधसंयुक्तमशांतं शांतिलालसं ॥ संवीक्ष्य
दत्तवज्ञानं दत्तात्रिर्महामुनिः ॥ २ ॥ समयूरेशक्षेत्रे तं गणेशं ध्यानमास्थितः ॥ स्वभक्त्या गणराजे
नशांतियोगयुतं कृतम् ॥ ३ ॥ तदाभ्यमहायोगी दुर्वासाः शांतिकारकः ॥ क्रोधहीनः स्वभावः स
संजातो ब्रह्मवित्तमः ॥ ४ ॥ एतदत्रिसुतानोने चरित्रं कथितं मया ॥ यथादक्षाय नो विप्रमुद्गले
नप्रकाशितम् ॥ ५ ॥ अधुना कथयिष्यामि स्वायंभुवस्य संतनेः ॥ चरित्रं सर्वपापघ्नं कथितमु

श्रीः ३१

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



तत्रगणेशो भक्तवत्सलः ॥ दत्तः खिन्नश्चतं ध्यात्वा तस्थौ तत्र प्रजापते ॥ ७५ ॥ ततस्तत्कृपया तेन स्वर्णतत्र स
मर्चितः ॥ योगाभेदमयत्नेन ज्ञात आत्मानिवेदकः ॥ ७६ ॥ दत्तो भक्तो गणेशश्च स्वामितस्येनिनाशि
नम् ॥ स्वामिनि सेवकः सोपि तदाकारेण संस्थितः ॥ ७७ ॥ इयं भक्तिर्गणेशस्यात्मनिवेदनरूपिणी ॥
दत्तेन साध्यता मुख्या शांतियोगमयत्नतः ॥ ७८ ॥ एतस्मिन्नंतरे तत्र प्रकटो भूत्स्वयं शिवः ॥ वि
ज्ञानेश्वरनामासौ दत्तं तं परिसस्वजे ॥ ७९ ॥ अहो दत्त महाभाग मम मित्रत्वमागतः ॥ अत्रैवा
हं गणेशानं ध्यायामि योगसेवया ॥ ८० ॥ ततो दत्तं पुरस्कृत्य शंकरो ब्रह्मणो सह ॥ गणेशं स्था
पयामास गंगायादक्षिणे तटे ॥ ८१ ॥ विज्ञानगणराजोयं नाम चक्रे महर्षिभिः ॥ तदा दिक्षेत्रविख्या
तं बभूव गणपस्य तत् ॥ ८२ ॥ विज्ञानाख्यं नामकं पुण्यं शांतियोगफलप्रदं ॥ सर्वसिद्धिकरं क्षेत्रं या
त्राकारिजनस्य च ॥ ८३ ॥ ज्येष्ठशुक्ल चतुर्थ्यां वेस्थापितो गणनायकः ॥ अतस्तत्र महोत्साहस्तद्दि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नभेदोमेकदाक्षिणेभविष्यतिमहामुने ॥ त्वत्प्रीतिंप्रवृद्धांमेत्रस्यास्यामिनिश्चलः ॥ ६७ ॥ गणेश
रानमाहात्म्यंत्वयात्रेचमुखाच्छ्रुतम् ॥ साक्षात्कारंकृतंतस्माद्दिंविज्ञानेक्षेत्रकम् ॥ ६८ ॥
विज्ञानोगणपोदत्तनाम्नाख्यातोभवाम्यहम् ॥ दर्शनाच्छांतिसंदातामविष्याम्यत्रमानद ॥ ६९ ॥ अ
श्री:३० प्रवासंप्रकुर्वंतिमद्दर्शेभक्तिसंयुताः ॥ शांतियोगंसदातेभ्योदास्यामिनेप्रसन्निधौ ॥ ७० ॥ अत्रपु
राशिवेनैवज्ञानंसाक्षात्कृतंपरम् ॥ विज्ञानेश्वरनामामेकृतोमयासशंकरः ॥ ७१ ॥ तस्यात्रसंनि
धिंस्थित्वात्वयातपसुसाधितम् ॥ अतःशंकरमित्रत्वंप्राप्तोसिमदनुग्रहात् ॥ ७२ ॥ त्वयाकृतमि
दंस्तोत्रंयोगशांतिप्रदंभवेत् ॥ पठतांशृण्वतांनृणांप्रसन्नभूतकारकंतथा ॥ ७३ ॥ धर्मार्थकाम
मोक्षाणांदायकंप्रभविष्यति ॥ सर्वसिद्धिप्रदंचैवसर्वेभ्योज्ञानदायकम् ॥ ७४ ॥ इत्युत्कांतर्दधे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सृष्टिकर्त्रे चपितामहे नमोऽस्तुते ॥ ५८ ॥ हरये पालकायैव नानादेहधराय च ॥ संहर्त्रे शंकरायैव कर्म्मा
कारायभानवे ॥ ५९ ॥ शक्तये चक्रियामूर्त्ते देवमानवरूपिणे ॥ नागासुरमयायैव कुंठिताय नमो
नमः ॥ ६० ॥ स्थावराय नमस्तुभ्यं जंगमाय नमो नमः ॥ जगद्रूपाय देवाय ब्रह्मणे ते नमो नमः ॥ ६१ ॥
किं स्तौमि त्वां गणाधीश योगाकारेण संस्थितम् ॥ वेदादयः समर्था न त्वां मनः प्रणमाम्यहम् ॥ ६२ ॥
धन्यो देशो मही योऽसौ पितरौ कुलमेव च ॥ विद्यायोगस्तपश्चैव त्वद्दर्शनात् ॥ ६३ ॥
इत्युक्त्वा भक्तिभावेन परिप्लुतो महामुनिः ॥ ननर्त्त हृष्टरोमा सो वानंदाश्रुकृतन्मुखः ॥ ६४ ॥ तत
स्तं स्वकरैर्धृत्वा गणनाथः सुसस्वने ॥ उवाच योगिनं पूर्णं वचनं परमाद्भुतं ॥ ६५ ॥ गणेशउवाच ॥
धन्योसि दत्तयोगीन्द्र ज्ञातोसि मदनुग्रहात् ॥ शांतिं लभसि पूर्णां त्वं मत्वा मां यि सर्वदा ॥ ६६ ॥ —

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



सहस्रोन्यायप्रणामकृतांजलिः॥ तुष्टावसुस्थिरीभूत्वाविघ्नेशंकुलदैवतम्॥५०॥ दत्तउवाच॥ नमोगणपतेतुभ्यं नमोयोगस्वरूपिणे॥ योगिभ्योयोगदात्रेचशांतियोगात्मनेनमः॥५१॥ सिद्धिबुद्धिपतेतुभ्यं पंचचित्तप्रधारक॥ नानाविद्याशीलायगणेशायनमोनमः॥५२॥ सिद्धिदात्रेसमस्तेभ्योनानैश्वर्यप्रधारिणे॥ मोहहंत्रेमोहकर्त्रेहेरंबायनमोनमः॥ ५३॥ स्वानन्दस्वामिनेतुभ्यंसंयोगाभेदधारिणे॥ नानामायाविहाराय विघ्नेशायनमोनमः॥ ५४॥ सांख्यायब्रह्मनिष्ठायबोधहीनायधीमते॥ परतोत्यानस्वरूपायविदेहायनमोनमः॥ ५५॥ बोधायसर्वरूपायदेहदेहिमयायच॥ स्वतउत्थानरूपायप्रकृतिलयनेनमः॥ ५६॥ सोहंकारायदेवायजगदीशायतेनमः॥ महतेविदुरूपायजगद्रूपायतेनमः॥५७॥ नानादात्मकगणेशायनानावेशप्रधारिणे॥ ब्रह्मणे

श्रीः २८

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



ज्ञानी हि पुत्रत्वं शान्तियोगस्य सेवया ॥ ४१ ॥ पंचचित्तप्रनाशेवे पंचेश्वर्ये पंगतो अधुना गणा
जस्त्वं मविनासिनसंशयः ॥ ४२ ॥ त्यजो वपूनमीगंत्वं भवाबभूतमुख्यकः ॥ अवश्यमहाचित्त
महदैश्वर्यमादरात् ॥ ४३ ॥ महाशांतिभजस्वत्वं योगेनदत्तसत्वरम् ॥ ददामि ते महामंत्रं गणेशस्य वि
धानतः ॥ ४४ ॥ ततएकाक्षरंमंत्रं ददौ पुत्राय भावनः ॥ अग्रियोगविदां श्रेष्ठं प्रणम्य ययावजः ॥ ४
४५ ॥ साक्षाद्विलस्वरूपश्च दत्तो योगविदांवरः ॥ गंगायादक्षिणेतीरे पूजयामास विघ्नपम् ॥ ४६ ॥
त्यक्त्वा भूमिस्वरूपं ससांतिमाप्त्वा ययोगवित् ॥ अभजत्तं सुभावेन गणपं हृदि चिन्तयन् ॥ ४७ ॥
महायोगी स्वयं दत्तो वर्षे सौके नशौनक ॥ शांतिं प्राप्तो विशेषेण गणपत्वो बभूवह ॥ ४८ ॥ तं दृ
ष्ट्वा गणपस्तत्र यमो भक्तिं निजेच्छया ॥ भक्तवात्सल्यभावेन दत्ताश्रमे सुशांतिदे ॥ ४९ ॥ तं दृष्ट्वा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



मीवेदेषु वेदवादिभिः ॥३२॥ क्रीडात्मकगणेशानः स्वानंदः परिकीर्तितः ॥ संयोगात्मकरूपेण स्वस्व
रूपिणीति श्रुति ॥३३॥ क्रीडाहीनोगणेशानोयोगरूपः प्रकीर्तितः ॥ निरानंदात्मकत्वेन सदाब्रह्मणि संस्थि
तः ॥३४॥ संयोगायोगयोर्योगे तयोनाशे गणेश्वरः ॥ शांतियोगात्मकः प्रोक्तोयोगिभिर्योगसेवया ॥३५॥
पूर्णयोगात्मकस्तत्र गणेशः परिकीर्तितः ॥ मायायुक्तविहीनत्वं मांतिमात्रं प्रकीर्तितम् ॥३६॥ पंच
चित्तस्वरूपांत्वं बुद्धिं जानीहि पुत्रक ॥ तत्र मोहकरी सिद्धिर्भ्रांतिदा मोहरूपिणी ॥३७॥ धर्मार्थकाममो
क्षाणां सिद्धिर्भिन्नाप्रदृश्यते ॥ ब्रह्मभूतमयीकथिता योगिभिस्तथा ॥३८॥ पंचधा चित्तवृत्तिर्यात
त्रयद्धिं वितंसुत ॥ तदेवगणराजस्य रूपं विद्धि वात्मकं परम् ॥३९॥ धर्मार्थकाममोक्षेषु ब्रह्मभूतेषु य
त्स्मृतम् ॥ ऐश्वर्यमोहजैर्दैन्यं भ्रमतिर्यत्र लालसः ॥४०॥ पंचैश्वर्येषु यद्धिं वंतदेवगणापस्य च ॥ जीवं



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सदास्वाधीनरूपस्वस्वेच्छयाक्रीडतेस्वयम् ॥२५॥ ब्रह्मभूतात्मकोयोगः स्वानंदाख्यः प्रकीर्तितः ॥ तत्रा
स्वाधीनतापुत्रपराधीनविधाकृतः ॥२६॥ ब्रह्मणिब्रह्मभूतस्यस्वतःपारतंत्र्यं ॥ उत्थानंनास्ति
संयोगाद्स्वस्वरूपिणियोगिनः ॥२७॥ स्वानन्देसतसंयोगोजगतांब्रह्मणांभवेत् ॥ सर्वाभेदेन
योगोयंतस्मान्मायासमन्वितः ॥२८॥ अयोगात्मकयोगश्चसदासंयोगवर्जितः ॥ जगतांब्र
ह्मणांतत्रप्रवेशोनोनविद्यते ॥२९॥ सदानिर्म्मायिकोयोगस्वसंवेद्यविवर्जितः ॥ स्वकीयामे
दहीनत्वान्निवृत्तिर्योगिभिर्वृता ॥३०॥ ब्रह्मब्रह्मणिसंस्थापनागतंनगतंपुनः ॥ स्वानन्दनाशतोतु
भ्यंब्रह्मभूतमयोगकम् ॥३१॥ ब्रह्मस्वानन्दवासीसगतिशंकयतेबुधैः ॥ नस्वानन्दात्मकःप्रो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नमु॥ सदसन्मयगंविश्वं ज्ञानीवेदवादतः॥१८॥तेभ्योविश्वसमाप्तूर्ध्वमेनेतिरूपः प्रकीर्तितः॥निर्मो
हः शिवसंज्ञश्चस्वाधीनंब्रह्मतद्बुधैः॥१९॥चतुर्णांब्रह्मसंयोगेस्वानन्दः कथ्यतेबुधैः॥सचैमा
यामयः संज्ञाङ्गोशोवेदवादिभिः॥२०॥अंतर्बाह्यक्रियासर्वाब्रह्मकारप्रदर्शयते॥कर्मयोग
श्री:२७ :सविज्ञेयःसंयोगःकर्मणांसुत॥२१॥ज्ञानात्मचक्षुषाज्ञानंयद्भवतियोगिनाम्॥तेषा
मभेदकोयोगोज्ञानयोगःप्रकीर्तितः॥२२॥ज्ञानानांकर्मणांचैवाभेदयोगःसमात्मकः॥आ
नंदात्मकरूपोयंद्वैधनाशेसप्राप्यते २३॥स्विष्टयाकर्मयोगश्चशुद्धतोयेनमद्रात्मना॥स्विष्ट
यातानयोगश्चस्वेच्छयानंदयोगकः २४॥ स्विष्टयासत्रिभिर्हीनःसहजाख्यःप्रकथ्यते॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नंश्रुत्वाब्रह्मपुत्रोमहातपाः॥ अत्रिरुवाच तंपुत्रंशांतिमिश्रंनमादरात्॥११॥ अत्रिरुवाच॥ शृणु
पुत्रप्रवक्ष्यामिशांतियोगंसनातनम्॥ ब्रह्मणाकथितंमेतंयेनशांतोऽहमंजसा॥१२॥ अस्माकंकुल
देवत्वंप्राप्तोगणपतिःप्रभो॥ सर्वेदेवादिदेवानांकुलदेवःप्रकीर्तितः॥१३॥ शांतियोगस्वरूपंतं
जानीहित्वंमहामते॥ भजस्वसुप्रयत्नेनतदाशांतिमवाप्स्यसि॥१४॥ गणेशात्सर्वमुत्पन्नंतेन
संस्थापितंजगत्॥ तस्याराधनमात्रेणकृतकृत्याःशिवादयः॥१५॥ नामरूपात्मकंसर्वंजगद्ब्रह्म
प्रकथ्यते॥ तदेवशक्तिरूपाख्यंब्रह्मसद्रूपकंपरम्॥१६॥ तत्रामृतमयंभानुमान्माकारिण
संस्थितम्॥ सद्रूपंतंविजानीहिब्रह्मवेदैःप्रकीर्तितम्॥१७॥ तयोरभेदतोब्रह्मसमंसर्वत्रसंस्थि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



समंनेन्यादिकब्रह्मसंस्थितः॥योगेननशोतोभूद्यथोक्तंतिरंततः॥४॥प्रणम्यभगवान्त्रिदृतो
योगिसमावृतम्॥साक्षाद्ब्रह्ममयंपूर्णंप्रोजालिःपरतोभवत्॥५॥अत्रिरात्मानितःसोपिनिषसा
दासनेस्वयम्॥उवाचपुत्रंनमत्रिंविनयसंयुतः॥६॥अत्रिउवाच॥स्वामिन्नानाविधंब्रह्मयोगेनसा
धितमयया॥~~[illegible]~~तत्रोपाधिःसमाधिषुउपाधिरहितोभवम्॥७॥
उपाधिंनिरुपाधिंचत्वत्कासम्येहमास्थितः॥तंत्वत्कात्र्यंमतेवैसहजेसंस्थितोभवम्॥८॥
तत्रदृष्टामहायोगिन्स्वाधीनत्वंसदाप्रभो॥तेनशांतिविहीनोहंकिंकरोमिवदस्वमाम्॥९॥स
इत्यात्रपरंब्रह्मलभ्यतेयोगसेवया॥अतोमांशांतियोगंत्वंकथयस्वमहामुने॥१०॥दत्तस्यवच

श्रीः २६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



र्ध्नासानाशमिष्यति ॥५२॥ इतितेकथितंसर्वंकारणंमुनिसत्तम ॥ तथामोक्षेप्रुभिर्भोगल
क्ष्मीश्वरताजिता ॥५३॥ यत्रभोगःप्रियोनित्यंतत्रमुक्तिर्नविद्यते ॥ यत्रमुक्तिःप्रियात्यंतंतत्र
भोगःकुतोभवेत् ॥५४॥ वासनायुक्तरूपाचभोगलक्ष्मीर्नसंशयः ॥ निर्वासनमयीमोक्षलक्ष्मी
र्जीवन्मुक्तिशीनक ॥५५॥ इतिश्रीमदार्त्ये॰ भोगमोक्षवर्णनंनामसप्तमोध्यायः ॥ ७ ॥ ० ॥
मुद्गलउवाच ॥ एवंदत्तस्तयोगीनयोगभूमिंसमाचरेत् ॥ नानाचेष्टायुतोदक्षअवधूतंप्रकाश
ति ॥१॥ गोवृक्षशासंयुक्तःपशुवत्पक्षिवत्कदा ॥ मृगादिहेदेचेष्टांस्मचकारमुनिसत्तम ॥२॥ स
इजावस्थायुक्तोवभूवांतेत्रिसंभवः ॥ तत्रांतर्यामिणांतोन्वाएवदपुक्तोवभूवह ॥३॥ व्यक्तव्यक्त

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



भयदायकाः॥४४॥इत्यादिबहुभिर्दोषैःसंयुक्तास्तेमहासुराः॥सदायोगप्रियाज्ञेयामुक्तौनहिभ
तःकदा॥४५॥देहंसर्वक्रियाणांतेकर्त्तारंप्राप्यदैत्यपाः॥सर्वथामुक्तिमुत्सृज्यभोगेश्वा
यामनादधुः॥४६॥अतस्तेश्वरराधातेईतामुक्तिर्विशेषतः॥भोगलक्ष्मीःशिरोभिस्तैर्वं
दितातत्रयत्नतः॥४७॥देवर्षयःसदायत्नैर्मुक्तिमिच्छंतिसर्वदा॥अतस्तेमस्तकेदेवींधा
रयामासुरंजसा॥४८॥असुरैर्योगिसंगेनधृतामुक्तिर्यदामुने॥सिरशिशुभदासानकार
णंकथयामिते॥४९॥दुराचारादिसंयुक्तायोगबुद्धिपरायणाः॥तेभ्यःसाशुभदाकुत्र
पितामातात्रिदंतिवै॥५०॥गृहीताविषयासक्तैर्वैक्षितापशुपोनक॥चरणाघातकैर्देवी
तडिताभोगभावतः॥५१॥अतोभागेषुभिर्विप्रवंद्याभोगप्रदायिनी॥यदिमुक्तिर्दुराचारै

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दिपादेषुसंस्थिता ॥ तद्भयेषांभयः प्राप्तिर्भविता नात्रसंशयः ॥ ३७ ॥ अ[illegible]नोनिस्तेजसास्पृष्टादैत्या
देवैः प्रताडिताः ॥ पपलुस्तत्र[illegible]पुरा सर्वे पातालं विविशुः पुनः ॥ ३८ ॥ मोक्षलक्ष्मीस्ततस्तेषां
पश्यतां मुनिसत्तम ॥ अंतर्धानं ययौ देवी ब्रह्मणो ब्रह्मभाविताः ॥ ३९ ॥ शौनक उ० ॥ सूतकू
र्त्वया प्रोक्तं नवृद्धं तन्मया श्रुतं ॥ मोक्षलक्ष्मीं शिरस्पृष्टा दैत्यानां दुःखदा कथम् ॥ ४० ॥ सू
त उवाच ॥ सम्यक् पृष्टं त्वया ब्रह्मन् कथयामि यथा श्रुतम् ॥ व्यासात्सर्वज्ञमुख्याच्च शृणु मो
नकयन्ततः ॥ ४१ ॥ रजस्तमोयुता दैत्या भोगलक्ष्मीपरायणाः ॥ परद्रव्यहताः सर्वे परस्त्रीगा
मिनस्तथा ॥ परापकारकर्तारो जंतुभ्यो दुःखदाः स्मृताः ॥ सदामद्यादिभिर्युक्ताः पापाचारा
विशेषतः ॥ ४३ ॥ साधूनां मुनिमुख्यानां देवानां योगिनां तथा ॥ वेदशास्त्रपुराणानां निंदको

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



तौतोस्तेनसिद्धाचमोक्षलक्ष्मीः प्रकाशिता ॥ गृहीत्वावामभोगेतांनिःसृतोजलमध्यतः ॥३०॥
दक्षिणोमध्यकुंभंसहस्तेधृत्वापमोस्वयम् ॥ श्रियासहविलासेनभोगयुक्तोबभूवह ॥३१॥ त्यक्त
स्तैरत्रिजोयोगीभ्रष्टोयमित्यभावतः ॥ सुखेनयोगमस्थायसंस्थितोत्रिसमुद्भवः ॥३२॥ गतेकि
यतिकालेचदेवासुरसमुद्भवम् ॥ एकुंदाहरागरूपंवैजातंतनुसमीपतः ॥३३॥ दैत्यैर्देवास्ततो
भग्नाःपपलसर्वतोदिशम् ॥ तत्रायपुःसुसंभीतारक्षरक्षतमब्रुवन् ॥३४॥ ततोसुरायपुःसर्वेभ
गशस्त्रधरावलात् ॥ तान्दृष्ट्वामरसंघास्तेपलायनपरायुतः ॥३५॥ दैत्यान्दृष्ट्वामहालक्ष्मींमोक्ष
रूपांस्वरूपिणीम् ॥ तांगृहीत्वायपुःसर्वेमस्तकेधृत्यमोहतः ॥३६॥ मोक्षलक्ष्मीस्मृतेस्तत्रय

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तद्वद ॥२२॥ सूतउवाच ॥ ब्रह्मणोंशसमुद्भूतश्चन्द्रस्तपसिसंस्थितः ॥ गणेशात्सवरंलब्ध्वामृतरूपोव
भूवह ॥२३॥ कलाभिःसर्वदेवानांपोषकःसतथानृणाम् ॥ किरणैरुद्भावेनवृद्धिकरःसदाभवत् ॥
२४ ॥ ततोविष्णुःकलांशेनसंभूतोयोगधारकः ॥ क्रमेणयोगमार्गेणानानाब्रह्मसंस्थितः ॥२५॥
वंशेऽतपिशाचादिवालानंदादिकामुने ॥ भवस्यासाधयामासनानाभूमिप्रकारतः ॥२६॥
तंदृष्ट्वायोगिनंसर्वेसेवयामभवान्नराः ॥ द्विजाद्याःसर्ववर्णाश्चाश्रमस्थाभक्तिभावतः ॥२७॥
क्षणंविश्राममन्यत्तंनलेभेमुनिसत्तमः ॥ दत्तोविष्णुस्ततोयातःकिंकरोमीत्यधारयत् ॥२८॥
ततस्तेनजलेविप्रमज्जितंयोगधारिणा ॥ प्रतीक्ष्यंतस्तीरेस्थिताःसर्वेभवंजनाः ॥२९॥

तीर

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



प्रणीतुर्भक्तिपुत्रास्त्वांसरोमोचावभूविरे ॥१५॥ ततस्तानब्रवीद्देवोभवतांपत्रिकीर्तितम् ॥ तदेवसफ
लंसर्वंभविष्यतिनसंशयः ॥ भक्तिर्मदीयेपादेषुभविष्यतिसुखप्रद ॥ सामर्थ्यंस्वस्वकार्येषुदृढंख्यातिं
गमिष्यथ ॥१७॥ भवद्भिस्तुमिदंस्तोत्रंसर्वसिद्धिकरंभवेत् ॥ यश्शृणोतिनरोभक्त्यापठतिस्यसि
द्धिदम् ॥१८॥ एकविंशतिवारंचतावद्दिनानियःपठेत् ॥ ससद्यःफलमाप्नोतिमनेप्सितंन
संशयः ॥१९॥ एवमुक्त्वागणाधीशस्तत्रैवांतरधीयत ॥ तेचस्वस्वगृहेसर्वेपत्नीभिःसमन्विताः
२०॥ स्त्रियश्चपुरुषाःसर्वेदक्षकन्यासमुद्भवाः ॥ सुखिनःस्वस्वकार्येषुबभूवुर्गणनायकाः ॥२१॥
शौनकउवाच ॥ अत्रिपुत्रामहाभागाब्रह्मविष्णुशिवात्मकाः ॥ तेषांविस्तारकंश्रेष्ठमिच्छामिसूत

श्री:२३

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गुरोर्धिका सहगा संवभूवह ॥१४॥ मातृसपत्नजात्तस्य भ्रातरो नवरण्वच ॥ तेषामाधीनतां याता
द्विजो सौ शांतियोगध्वके ॥१५॥ भ्रातृपत्नीमहोत्तिका स्वकुः स्नेहं नस्वल्पकम् ॥ जाहि पृंकुत्ति
तं चाग्नं ज्वलितं नदुःस्तुषम् ॥१६॥ वस्त्रादौ भ्रातरः सर्वे भोषणोस तं नतं ॥ च कुस्नेहं परित्यज्य
कुलपांसुवदंतिते ॥१७॥ तेषामृतं समं सर्वं कुत्सितं कूप्य दग्धकम् ॥ अन्नं च भस्मयोगीश्च चीर
वस्त्रैः समाधृतः ॥१८॥ तदपि भ्रातृजायास्ता अन्नं नस्पेचनोदद्दुः ॥ द्वित्रिदिवसमध्येस्वगृक
भुगभवमुनिः ॥१९॥ क्षुधयापीडितो योगिगरापत्न्याप्रजापते ॥ वभामान्नार्थमन्यत्तं गृहेग
हे विचक्षणाः ॥२०॥ नत्रलोकैः स्वकार्यार्थं यहिनोयत्रनत्रसः ॥ च कारसकलं कार्यं तेषामन्नार्थमा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



दरात्॥२१॥ततस्तेहर्षिताःसर्वेवस्त्रान्नादिकमादरात्॥ददुःसोपिप्रसन्नात्माकामकारोभवत्स्वयम्॥
२२॥ततस्तैर्भीतिभिर्दृष्टंमानयन्गृहेस्वके॥स्वकामकारिणांचक्रुर्भीतिरौद्र्यसंभृतः॥२३॥तद
पिभीतिजायास्तांकस्मिन्नन्दैदेसुभृ॥सुधासमंभक्षयन्सोपिभावंप्रदर्शयन्॥२४॥क
दाचित्यक्षशालीनांक्षेत्रेशस्यापितोमुनिः॥भ्रात्रभीरक्षणार्थंसरात्रौवैदिवसेप्रभो॥२५॥
तत्रचित्रमभूत्तस्यतच कार्यंप्रभापते॥चौराणांस्वामिनांदेविभद्रकालिश्चसंस्तुता॥२६॥
ममयदिलभेद्रव्यंविपुलंचेज्जगन्मये॥तदापूरुषरूपंतेदास्यामिपरमुत्तमम्॥२८॥द्र
व्यंतस्यतथाप्राप्तंतेनाहंप्रेषिकास्वकाः॥चौराणांस्वामिनांदेवीस्तत्राऽऽगमयदृच्छया॥२९॥

श्रीपु॰

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



अंतंगहीनाबलान्सर्वेजग्मुस्थानंचकंबलाः॥योगिनांदेहप्राणंजानंचतादृशंसके॥३०॥तत्रचौ
राधिपेनैवताक्षतैःपूजनादिभिः॥भोजनंसचकारापिसादंद्विजेंद्रसत्तमः॥३१॥तंपुरस्यवा
दित्रैर्नदद्भिःप्रयचौखलः॥देवीसन्निधमानंदान्पुष्पंगयरमादरात्॥३२॥पूजयित्वामहा
कालींतनस्तंमुनिपुंगवम्॥परस्त्याजिनाहंतुनगृहंचकारसः॥३३॥मरणंदेहिभावस्य
दुष्टोयोगिसत्तमः॥नकिंचिद्दुःखंतस्यसंसारगरापंदृढि॥३४॥अद्यैवपतितोदेहो
यथास्तुचिरजीवकः॥तत्रकिंकारणंमेनगजानंनमोस्तुते॥३५॥एतस्मिन्नरिनत्रदेवि
कोपसमाचरति॥गणापत्यामहाकालीनिःसृतामूर्तिमध्यमः॥३६॥खड्गंचौराधिपस्या

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



श्री: ६०

हस्ताज्जग्राह लीलया ॥ तेन नत्वा शिरश्चित्वा पयोऽधिरमुत्तमम् ॥ ३७ ॥ अन्येस्समागतैश्चौरास्तो
षितैर्जननाशिता ॥ चिक्रीडुश्चमनैर्देवि गरीशागमनत्परा ॥ ३८ ॥ तांप्रणम्यपयोदक्षवभ्रा
मनयनत्रसं ॥ स्वेच्छाचारी महायोगी भिक्षासी गणपंपरम् ॥ ३९ ॥ इतिश्रीमदांत्ये चौरवधो
नामैकोनविंशतितमोऽध्यायः ॥ श्रीः पातु ॥ मुद्गल उवाच ॥ सिंधुदेशाधिपोराजा
हरणादनिसूनुः ॥ पूर्वसंस्कारयोगेनायानिशोवभूवेह ॥ १ ॥ राज्ञासान्यर्थमन्यर्थंपत्रवान
प्रापनीनसः ॥ पयोगंगासमीपस्थंकपिलाश्रममदरात् ॥ २ ॥ गौतमीदक्षिणेकूले कुत्वान्दिनं
पुंगवान् ॥ निजग्रामपुरप्रजाश्चिवाक्यांसमास्थिताः ॥ ३ ॥ अध्यागोनरायत्तः श्रीनवा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लोकहितपतिः॥ध्यात्वा प्रोजयामास वाहार्थं च जनैः सदा॥४॥ तत्रैव प्रसंगेन समाख्यं महा
मुनिम्॥ आंजीरसवरं तंत्रे वदा वीहकमंजसा॥५॥ शान्ते देहगतिं योगी प्राख्याथीनमादरा
त्॥ वाहकोऽपते दृष्ट्वा बभूव विगतज्वरः॥६॥ अहिंसापरमो योगी मार्गे जंतुमवेक्षसः॥ च
पादक्षपरांतत्र चर्करं जंतुवर्जितः॥७॥ तेन सर्वे बभूवुश्च वाहाकामंरगामिनः॥ डोलयामा
नया राजा शीविकया सुदुःखितः॥८॥ ततः क्रोधसमाविष्टो हुंकराडवाचतान्॥ सम्यक् शीवि
कां वाहा वहध्वं प्रयतात्मना॥९॥ ततो भीतास्ते सर्वे तम् दुरध्वानं पमूः॥ आजीनसदुरा
त्मायं चलति मद्यपोयथा॥१०॥ ततो राजा महात्मानं उवाच चिंत्वया सठं॥ उन्मत्तवद् भिदुष्ट

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





क्रियतेमेप्रसन्नेथो ॥११॥ततोभावीवलेनासावांगीरसउवाच ह ॥ज्ञात्वातंयोगमिच्छंतंपात्रभूतमनो
दराम् ॥१२॥जडभरतउवाच ॥मायामयमिदंसर्वंभ्रांतिरूपसमन्यकम् ॥तत्तरांजनानांवेजनाःकै
त्रप्रदर्शिते ॥१३॥विषयिन्वावयंदुःखंसमभावेनसंस्थिताः ॥शिक्षाकर्तीभवेद्राजास्माकंकथंमहाव
ल्लः ॥१४॥तेनकिंयोमार्गस्वंत्यक्त्वाक्षिप्तमसांप्रतम् ॥तदधीनाभवामःकिंतस्मानेनवदस्वयम् ॥१५॥
इत्युक्तोमौनमास्थायशिविकांपूर्ववद्वहन् ॥आंगिरसोमहाघोरचालगत्वापंभजन् ॥१६॥राजा
शुमहावाक्यंयोगगर्वितमुत्तमम् ॥भयभीतोभवत्तस्यप्रोत्यपासमहीतले ॥१७॥दृष्ट्वानंमलिनं
चिप्रंयज्ञोपवीतसंयुतम् ॥विभ्रंचीरवस्त्रंचब्रह्मतेजसनानम् ॥१८॥प्राणानामसमाशृंगंदातज
पुरःस्थितः ॥जडेगोभयभीतस्तंरहूगणःसध्यमीवितु ॥१९॥रहूगणउवाच ॥अपराध्यंमहातंमे



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्षमावन्तं दयानिधे ॥ अज्ञानेन दानं ब्रह्मन् किं विप्रोसि वदस्व मां ॥ २० ॥ अवधूतामहात्मानं स्वं
नियत्रकुत्रचिन्नु ॥ नया न्वमपि मे भासि यज्ञोपवीतधारक ॥ २१ ॥ कपिलो नारदः किं त्वं गिरा
उसः क्रतुः ॥ दृष्टो वा यात्रवल्क्यस्त्वं वदमां करुणानिधे ॥ २२ ॥ अहं विभेमि विप्रेंद्र ब्राह्म
णानां प्रधर्षणात् ॥ न ब्राह्मणसमं किंचिद्दैवतं सचराचरे ॥ २३ ॥ सा ज्ञापरमेश्वरस्यापि तन
वो ब्राह्मणा मताः ॥ कर्मधारा ज्ञानधारा ब्रह्मधारा कथाः ॥ २४ ॥ ब्राह्मणास्य मुखे नैव य
द्भुतं तत्समागतम् ॥ दिवस्थानेन देवानां मुदरेनात्र संशयः ॥ २५ ॥ ब्राह्मणेभ्यश्च यद्दत्तं तद्दक्षयपद
प्रदम् ॥ उद्धरायज्ञनानां वै ब्राह्मणाः समनाः सदा ॥ २६ ॥ मंत्राधीनाः सदा देवा विप्राधीनास्तथा
देवानां जीवनं सर्वं द्विजाधीनमतः प्रभो ॥ २७ ॥ मंत्रहीनं हि कर्मभिः फलं यायते चतत् ॥ कर्मधी



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नंजगत्सर्वमनोब्राह्मणामूलकम्॥२८॥कर्मिनिष्ठास्तपोनिष्ठाज्ञाननिष्ठाद्विजोत्तमाः॥योगिन
श्चभवंतीहतारकोजगतीस्थितम्॥२९॥सर्वेषांगुरवोविप्राज्ञानदानैःसुसम्मताः॥साक्षाद्गुरु
स्वरूपत्वाद्ब्राह्मणानात्रसंशयः॥३०॥तेषांद्वेषनमात्रेणापतंतिशिवमुख्यकाः॥सेवनेनसदाते
षांसर्वेसत्येभजेनाः॥३१॥ब्राह्मणानांचशापेनविष्णुमुख्याःसुरेश्वराः॥पतिताअवतारेषुपुनः
संस्थापितादिजैः॥३२॥अतोविभेमिविप्रेशवदकस्त्वंमहामते॥विष्णुशिवादिदेवेभ्यस्त
थाहंनबिभेमिवै॥३३॥एवमुक्त्वामुनेःपादौगृहीत्वाप्रणनामसः॥पादपद्मेशिरस्थाप्यरुरो
दभयविह्वलः॥३४॥तंतोषौकरुणाविष्णोनडभरतस्तमब्रवीत्॥उत्थायाप्यरुपशार्दूलंप्रश्रयावनतंवचः॥३५॥



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तुवैनघ२

इतिश्रीमद्भागवते महापुराणे एकादशस्कंधे नवमोऽध्यायः ॥२०॥ श्रीः ॥ जडभरतउवाच ॥
अहमांगिरसो नाम जडभरतः प्रकथ्यते ॥ स्वायंभुवर्षिपालो भरतश्चाध्वनाजडः ॥१॥ सा चिंता
कुरुराजर्षे यज्ञेन तपसा स्वयं ॥ देहस्य मे शरीरस्य पापदं न भविष्यति ॥२॥ गंधराजेन्यथा पुत्रं
मन्तस्तेन भयं भवेत् ॥ मन्निष्यामि स्वतंत्रोऽहं प्रारब्धेन नियंत्रितः ॥३॥ सुदृढ उवाच ॥ तस्य योगीन्द्र
मुख्यस्य श्रुत्वा वचनमुत्तमम् ॥ रहूगणाऽब्रवीद्वाक्यं प्रणम्य मदायशाः ॥४॥ रहूगणाऽब्रवीत् ॥ धन्यं
कुलं मदीयं वै पितरो मे तमोऽग्रमः ॥ तपो विद्या यशो दानं तेषां श्रियुदर्शनात् ॥५॥ अहं सिन्धु
महीपालो रहूगणाऽस्मि सत्तमः ॥ राजादिविषयेन्यत्कानिः स्तो मुनिसत्तम ॥६॥ शांत्यर्थं कपिलं या
मि गोतमीतीरवासिनम् ॥ त्वं सा प्राद्भुत रूपश्च दैवेन दर्शनं गतः ॥७॥ शिष्यं तारयतां योगिन्योगबोध

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नमनम॰॥ साक्षाच्छांतिं वदस्वत्वं यथा शांतो भवाम्यहं॥ तस्यतद्वचनं श्रुत्वा दयया परयायुतः॥
जगादतं नृपेन्द्रं स आंगिरसो महाद्युतिः॥८॥ शरणार्जस्त्वया पृष्टं वेदगुह्यसुदुर्लभं॥ कथया
मि तथापि ते योगशांतिकरं परम्॥९॥ द्वैधं अनुविधः प्रोक्तस्तत्र देही चतुर्विधः॥ भ्रांत्याभिन्न
त्वमाश्रित्य कोपि भाति तदात्मकः॥११॥ देहानां ब्रह्मयत्प्रोक्तं विंदुमात्रप्रदर्शने॥ देहिनां ब्र
ह्मरूपं यत्सोहं मात्रानकं मतम्॥१२॥ तयोः संयोग एवासौ बोधात्मक उदाहृतः॥ स्वतोत्या
नमिदं ब्रह्म विकल्पाद्धि विध्यं मतं॥१३॥ बोधनाशो भिदापाय उत्पत्तिर्न यायते न च॥ सौख्यरू
पं हितं ब्रह्म केवलं स्वसुखं नम्॥१४॥ यत्र परासुखं नास्ति तत्र वैस्वसुखं कथं॥ ते नमस्यरतोत्या
न पुत्रं ब्रह्मयकीर्तितम्॥१५॥ तत्रौ शानस्य बीजं यत्स्वतंभिन्नात्मकं परम्॥ स्वसुखं निष्ठरूपं हि

श्रीः ६३

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मोक्षहीनप्रभावतः॥१६॥स्वतःपरतउन्यायहीनेस्वानंदवाचकम्॥संयोगाभेदरूपंवैज्ञानीहि नृ
पसत्तम॥१७॥स्वानंदःपंचभेदेनसर्वत्रसंस्थितःस्वयम्॥सन्यासन्यसमानेनेतिरूपंचतुर्थकं॥
१८॥स्वतपरउन्यानमेतन्नामप्रकीर्त्तितम्॥तयोरनुबोधःस्यात्तदेवतस्यहृपकम्॥१९॥नाभ्यांना
नाविधंब्रह्मनादिवेदेप्रकीर्त्तितम्॥जगन्नानाविधंतद्ज्ञानीहिराजसत्तम॥२०॥नामरूपमयंस
र्वमसत्यंपरिकीर्त्तितम्॥शाक्तंब्रह्मसमाख्यातंवेदेषुब्रह्मवादिभिः॥२१॥नामरूपात्मकेषुयत्स
दाखंडमयंस्मृतम्॥[illegible]संयोगोयोगेनैतौप्रदृश्यते॥२२॥तंदेवज्ञानमाख्यंहिसंशांति
मयःस्मृतः॥२३॥अ[illegible]मतंसौरमात्मानंब्रह्मसर्वप्रकाशकम्॥२४॥तयोरभेदकर्त्तासौविष्णुरानंदसं
ज्ञकः॥द्वयोःसमंचतंब्रह्मभावाभावमयंपरम्॥२५॥त्रिभिर्हीनंतुरीयंयत्रैतिकर्त्तासिवःस्मृतः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



अव्यक्तं मोहहीनं यत्स्वाधीनं ब्रह्म तन्मतम् ॥२६॥ चतुर्णां चैव संयोगो यत्र भेदमपस्मृतः ॥ तद्देवस्वस्व
रूपाख्यो मयापुक्तो विनायकः ॥२५॥ संयोगो योगिनां जन्मिवृत्तिरुपजायते ॥ स्वकीयभेदहीनत्वात
द्ब्रह्मयोगसंज्ञिकम् ॥२६॥ अतएव स्वनाशाय निवृत्तात्तच्च लभ्यते ॥ मयायासर्वसंयोगस्तद्धीनं ब्रह्म
तस्मै नमः ॥२७॥ अयोगश्चैव संयोगो योगेनैव प्रदृश्यते ॥ तद्देवगणनाचोहि गंशांतिमयः स्मृतः ॥
२८॥ मायायुक्तश्च मायावी मायाहीनश्च केवलः ॥ तद्देवभांति मात्रं यत्र त्र्यं योगिभिः सदा ॥२९॥
चिंतयं चविध्यं प्रोक्तं तद्देवयं प्रभाषते ॥ मोदहं द्विविध्यं त्यक्त्वा शांतिरूपो भविष्यसि ॥३०॥ स्वं
रहुगणराजा साधयित्वा विधानतः ॥ शांतिप्राप्तो महातेजा गणपत्यो बभूव ह ॥३१॥ श्री ॥ इति श्री
महांत्ये रहुगणसिद्धिप्राप्तिर्नामैकविंशतितमोऽध्यायः ॥ श्री॰ ॥ सूत उवाच ॥ ततो अंगिरसा प्रो

श्री:६४

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



गौविचचार मही तले ॥ मयूरेशस्य क्षेत्रस्य आययौ वै देवयोगतः ॥१॥ तत्र पूर्णिवनाख्यं गणेशस्य महा
त्मनः ॥ दृष्ट्वा पूजान्वाचितं तं सध्यायन्नेकत्रमुरुवत् ॥२॥ वर्षमात्रे गते तस्य दृष्टीनार्थयथो स्वयम् ॥ गणेशो
मूषकारूढः सिद्धिबुद्धिसमन्वितः ॥३॥ तं दृष्ट्वा प्रणनामादौ तुष्टाव प्रांजलिः प्रभुम् ॥ रोमांचः साश्रुनेत्रः
सभक्तिभावनिमज्जितः ॥४॥ गजमुखाय नमः शांतिस्वरूपाय शांतिदायक पालवे ॥ विघ्नेश
यनमस्तुभ्यं हेरंबायनमोनमः ॥५॥ सिद्धिपते वदात्रे भक्तानां भयभंजन ॥ भक्तिप्रियाय वै तुभ्यं
भक्तभक्तायते नमः ॥६॥ बुद्धिपते वदात्रे च सर्वविद्याकलाभने ॥ ज्ञानरूपप्रकाशाय गणेशाय ते
नमः ॥७॥ मूषकारूढ वै तुभ्यं चतुर्वीर्यधराय च स्वानंदवासिने देव वक्रतुंडाय ते नमः ॥८॥ ना
नाविहारयुक्ताय नंतरूपाय ते नमः ॥ क्षमेयाय सदा योगशांतिस्थाय नमो नमः ॥९॥ धन्योहं दान

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



दात्रीहृदयेन दृष्टा जानन:॥ वेदादौ गोचरो यंन दाप्यप्राप्तसहस्रांगत:॥११॥ मया किंते दातं देव दर्शनार्थं
किमागत:॥ भक्तिसमं न किंचित्ते प्रियं ज्ञानं मया पुना॥१२॥ भक्त्या त्वां हृदि संध्याय संस्थितो जडव
प्रभो॥ त्वमेव मोहितो भक्त्या मम सन्निधिग: दान:॥१२॥ अतो भक्तिसमं किंचित्रैव दृष्टं न च श्रुतं॥
श्री: ६५ यया यंशांतियोगस्थो मोहित: सहमागत:॥१३॥ त्वदीयांशसमुद्भूतं सकलं ब्रह्मनायक॥ किं दद्या
मि गणेशानयेन तुष्टो भविष्यसि॥१४॥ अतस्त्वं नमनं कुर्वे देहो यंते निवेदित:॥ वरं देहि महा
बाहो येन तुष्टो भवाम्यहम्॥१५॥ त्वच्छरीरे दृढां भक्तिं यामि त्वां सर्वविवर्जिताम्॥ देहि नाथ दया
सिंधो नान्यथा चे कदाचेन॥१६॥ एवमुक्तो गणाध्यक्षं नत्वा मस्य पुन: पुन:॥ प्रेमाणानेन्द्र योगीन्द्र
स्तमुवाच गणाधिप॥१७॥ श्रीगणेश उवाच॥ भक्तिं सुदृढां भक्तिं मम या मुनिसत्तम॥ यामि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चारविहीनानभोरसनसंशयः॥१८॥व्यासानमिदं स्तोत्रंमदीयंयोगशांतिदम्॥भविष्यतिमहा
भाग्यमप्रीतिकरंपरम्॥१९॥यंयमिच्छितंतंवैदास्यामिस्तोत्रपाठतः॥शृणुयान्नस्यतद्भूयाद्भवि
ष्यतिनसंशयः॥२०॥एवमुक्त्वातदर्द्ध्वेसोगगनाथप्रजापते॥समुनिर्भक्तिसंयुक्तस्तत्रैवसंस्थितोभ
वत्॥२१॥अंतेगणेशरूपोसौजातोयोगीन्द्रसत्तमः॥तत्रगुहाप्रसिद्धाप्रवर्त्तितेमहामुने॥२२॥
गणेशोत्तरभागेचसन्मुखेकेशदूरतम्॥स्थानमांगिरसस्यापिभरतस्यजडात्मकः॥२३॥तत्रयेद
र्शनंतस्यकुर्वंतिमानवाद्यः॥तेषांमुक्तिर्भवेद्दक्षशाश्वतीनात्रसंशयः॥२४॥चरितंजडभ
रतस्यकथितंपरमाद्भुतम्॥यःशृणुयान्नरोभक्त्याःपठेद्भुक्तिमुक्तिदम्॥२५॥एवमादिच
रात्मोत्तमःप्रियव्रताच्चयेऽभवन्॥उत्पन्नाःसर्वेधर्मज्ञानानादेवपरायणाः॥२६॥ इतिश्रीमद्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



त्ये.नउभरत चरित्रं नामद्वाविंशोऽध्यायः॥२२॥ छ॥ ॥ सूत उवाच॥ स्वायंभुवो मनोः प्र
ोऽनानपादसंज्ञितः॥ सराज्यं मध्यदेशस्य चकार धर्मसंयुतः॥१॥ सुनीत्या स्ववंशनिनीरा
जातया विमोहितः॥ सुनीतिमन्यते नस्ममसापि प्रजापतिः॥२॥ तस्य भार्ये प्रविख्याते सुनीति
सुरुचिस्तथा॥ सुनीत्या स्ववंशनीतो राजातया विमोहितः॥३॥ एकदा ध्रुवपुत्रश्चाथयोराजः म
ीपगः॥ इच्छंतो त्रोऽतसंगेसंस्थितस्य सन्निधौ॥४॥ तत्रावसानि तस्तेन सुरुच्यादृष्टो
वनः॥ ततो ध्रुवो वनं दक्षजगाम क्रोधसंयुतः॥५॥ मार्गे वेगद्भुतस्तस्य नारदो दृष्टिमागतः॥
तन्नामम हाबुद्धिर्वीसोपिधर्मिधारकः॥६॥ दर्शितम खिलं शास्त्रं नारदेन महात्मना॥ उप
दिष्टो महामंत्रो विष्णोश्च द्वादशाक्षरः॥७॥ नारदं सप्रणम्यादौ मथुरायां ययौ ततः॥ तत्र तपश्च

श्रीः ६६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कारसोऽध्यायन्विष्णुसनातनम्॥८॥सहस्रवर्षमन्यैर्नतप्तापरमंतपः॥अस्तौभगवाँस्तत्रनंपो
भक्तिभावतः॥९॥ददौतस्मैसखंराज्यंवैपुत्रिव्यःपरमाद्भुतम्॥अंतेस्वर्गस्थरा ज्यंयथादविष्णो
र्ध्रुवात्मकम्॥१०॥नेतःस्वराज्यमागत्यननामपितरौध्रुवः॥तंराजानमयाजास्वहस्तंमेसायुतम्॥
११॥कालेनतंध्रुवंराजाचकारसधराधिपम्॥वनंपयौमहातेजास्तप्तापरमंतपः॥१२॥तत्रा
ऽत्यगरोशोवैनारदस्तमुवाचसः॥भेदाभेदादिहीनंत्वंगरोशंभजपार्थिव॥१३॥शिवविष्णवाद
योदेवायोगिनःसम्कस्यः॥जाग्रिगरावशिष्टाद्याभजंतेतंनसंशयः॥१४॥तंगरोशंविनाशां
तिंलभतेराजसत्तमः॥स्वायंभुवादिभूपालैष्ठसेवितोगणनायकः॥१५॥एवमुक्तोगरोशस्यददौ
मंत्रंषडाक्षरं॥एजामंत्रप्रभावेणगणपत्योबभूवह॥१६॥सरोगणानांयेसंस्थासन्पोनमः॥



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



श्रीः ६७

अन्यच्चकथितंतेनविष्णुनाकरुणावता) सायुज्यंगरुडानाथस्यप्राप्तंरामहात्मनः॥१७॥ध्रु
वोराज्यंचकाशाद्यधर्मयुक्तोमहीपतिः॥जगामसहसातत्रनारदःकरुणानिधिः॥१८॥तं
स्वप्रणामासापूजयामासभक्तितः॥स्वहृदंपूर्णभावेनकृतांजलिःपुरःस्थितः॥१९॥तमुवा
चमहायोगीनारदोदिव्यदर्शनः॥स्वशिष्यभक्तिसंयुक्तंदयावद्यानिधिः॥२०॥नारद
उवाच॥शृणुध्रुवचोरम्यंविकुंठादागतोध्रुवा॥विष्णुनाप्रेषितोहंवैतवहेतोर्महामते
॥२१॥मयूरेशस्ययत्क्षेत्रंभुविप्रत्तमंपरम्॥तत्रगत्वामहायात्रांकुरुत्वंविधिवत्सुतः॥२२॥
तेनाक्षयपदंतेवैभविष्यतिमदीप्सितं॥नान्यथाविष्णुसंयुक्तःप्रतिष्यसिनसंशयः॥२३॥अन्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



अकथितं तेन विष्णुना करुणावता ॥ एकाक्षरं गणेशस्य महामंत्रं जपस्व वै ॥ २४ ॥ तेन मंत्रप्रभावेण पा
लेवसदिनोद्भव ॥ ध्रुव पदं त्वं गंतुं तदान्तं शांतिमेष्यसि ॥ २५ ॥ ब्रह्मणा ब्रह्मभूतश्च भविष्यसि न
संशयः ॥ अन्यथा योगशांतिं त्वं प्राप्स्यसि न कदाचन ॥ २६ ॥ श्रुत्वा तं दो योगीद्रो मंत्रविधानतः ॥
एकाक्षरं गणेशस्य राजा सिद्धो बभूव सः ॥ २७ ॥ मयूरेशस्य क्षेत्रं वै ध्रुवः सद्यः समागतः ॥ चकार
विधिवद्यात्रां द्वारादिचिह्नसंयुताम् ॥ २८ ॥ गणेशं स्थापयामास ब्रह्मणो मंत्रकोविदे ॥ अर्द्धको
शगणेशस्य नाम्ना पूर्वद्वारसमीपकम् ॥ २९ ॥ देवालयं चकारासौ महामोदं सुविस्तृतं ॥ सुवर्णशि
खरं रम्यं पूजयंत्सं सुभक्तितः ॥ ३० ॥ नामस्तस्याकरोद्राजा ध्रुवविनायकस्तदा ॥ वर्षमात्रं निवासं
चध्रुवस्तत्र चकार ह ॥ ३१ ॥ पश्चात्त्वं नरैर्गे [illegible] राज्यं च प्रेमतो बलः ॥ अंगारकस्तु गमंदे सध्रु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





वाख्यं ज्योतिषांधरम् ॥३२॥ तत्रगत्वापतिं ध्यायन् संस्थितोसौ महायशाः ॥ ध्रुवपदस्य नाशांते गतः
स्वानंदमंजसा ॥३३॥ ध्रुवविनायकं ध्रुवभुविभुक्तिंसुनिश्चलाम् ॥ त्वमत्तेमानवस्तत्र श्रुत्वाध्रौ
वमिदंतथा ॥३४॥ इति श्रीमदांत्येध्रुवचरित्रंनामत्रयोविंशोऽध्यायः ॥२३॥ श्रीः ॥ ० ॥

श्रीदृ॰ मुकुलउवाच ॥ ध्रुवस्यान्वयसंभूतोंगस्तेजस्वीमहीपतिः ॥ धर्मात्मासर्वमान्यश्चचित्रवत्या
सकोभवत् ॥१॥ मृत्युकन्यामवद्भार्याराज्ञस्तस्यमहात्मनः ॥ तस्यांतस्मांसमुत्पन्नः पुत्रोवेनःसदा
रुणः ॥२॥ तंपितापाशिक्षयन्नीतोनसाधुरभवत्सुतः ॥ राज्यंत्यक्त्वावनंराजादुःखयुक्तोजगामह ॥
३॥ ततोराज्यविहीनेचदेशेचौराबभूवह ॥ तैर्लुंठितंजनानांसर्वस्वंयत्रतत्रहि ॥४॥ प्रजाः
सर्वाभयोद्विग्नाब्राह्मणान्शरणंययुः ॥ ब्राह्मणैराज्यसंक्षिप्तःसवेनःपैतृकेतत ॥५॥ सराज्ये

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्राप्य दुर्भिक्षौरान्त्या समंततः ॥ राज्यं वकारदेशेषु कंपयन्वरसुध्यातलम् ॥ ६ ॥ नयमांगिपरित्य
ज्य यथेष्टाकारकोभवत् ॥ तेनवर्णाश्रमाचारसंयुक्ताः दुःखिनः कृताः ॥ ७ ॥ पुनस्तेतापसास्तान्वै
शरणंजग्मुरादरात् ॥ तापसैर्वारितोवेनउवाचतान्द्विजोत्तमान् ॥ ८ ॥ वेनउ० ॥ अहंपूज्यश्चसर्वे
षांपालकोनात्रसंशयः ॥ मांभजध्वंमुनीन्द्रावैयोगक्षेमकरंसदा ॥ ९ ॥ तस्यतद्वचनंश्रुत्वाकुपि
ताब्राह्मणास्ततः ॥ शापेनमारयामासुस्तंनृपंनयवर्जितम् ॥ १० ॥ तस्योरुमंथसंभूतंममथु
र्नयहेतवे ॥ तस्माकूरःसमुत्पन्नस्तस्यपापमयोमरः ॥ ११ ॥ ह्रस्वकायःप्रामवर्णाश्मश्रुलःपि
ंगलोचनः ॥ तंदृष्ट्वाब्राह्मणाःप्रोचुर्निषीदेतिप्रजापते ॥ १२ ॥ तेननिषादनामासौजातस्तस्मैवना
नरे ॥ स्थानंददुर्द्विजश्रेष्ठानैषादास्तत्समुद्भवाः ॥ १३ ॥ पुनश्चदक्षिणांगंतेममंथुर्द्विजसत्तमाः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



वनस्यदं पतीनस्मात्समद्भूतौमहौजसौ॥१४॥विष्णोःकलायुतौसाक्षाद्ब्राह्मणानमतःपुरा॥ब्राह्मणौर्ध
पवर्यःसप्तसिंधुराज्यकर्म्मणि॥१५॥पृथुर्नामनृपालोविख्यातोभुविमंडले॥स्वधर्म्मनिरतः
साक्षात्क्षात्रधर्म्मनिवर्तकः॥१६॥तेनसंवर्द्धितावर्णाश्रमयुताविधे॥सुमुद्रश्चपुरेदेशोय
त्रतत्रसुसंस्कृताः॥१७॥गतेकियतिकालेवैलोकाअन्नविवर्जिताः॥क्षुधयापीडिताःसर्वे
तंनृपंशरणंययुः॥१८॥वेनस्याधर्म्मभावेनभूम्यसर्वंसमाहृतं॥पुनर्द्धातुमशक्ताभूद्धर्म्मरूपेन
राधिपे॥१९॥लोकानांदुःखमाकर्ण्यकुपितोसौनराधिपः॥विचार्यधनुराकर्षशरंत्रेषुंयु
योजचा॥२०॥भूमिंहंतुंमनश्चक्रेआकर्णाकर्षितंधनुः॥यावद्गुणांसचिक्षेपतावद्भीताभव
द्भुवा॥२१॥गौरूपेणाभयोद्विग्नापपातनपतत्रसा॥अन्नब्रह्मोनपःपश्चाद्धयौयमइवापरः॥२२॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शरणं वालवद्भूमिस्तमेव शरणं ययौ ॥ उवाच प्रांजलिं कृत्वा नृपं कंपसमन्विता ॥ २३ ॥ स्त्रिपंगोमां
कथं हिंसी भूमिपाल वसंधरां ॥ शरणागतरूपांते रक्षक्षत्रिकुलोद्भवे ॥ २४ ॥ भूमेर्वचनमाकर्ण्य
जगादनं नृपोत्तमः ॥ शृणु त्वां मारयिष्यामि मच्छासनपराङ्मुखीं ॥ २५ ॥ विजीनुमिहुसिप्रा
ज्ञे तदा त्वं विविधरे ॥ कुरुप्रकरुपं त्वं सदा कालं न संशयः ॥ २६ ॥ ततस्तं विनयं श्रुत्वा जगा
दसावसंधरा ॥ मया यस्ता समग्राया ओषधयो नृपात्मज ॥ २७ ॥ भक्षितास्ताः पुनर्दातुं कथं
शक्ता भवाम्यहो ॥ अतस्त्वां मारयामि दौ कुरुपार्थिवसत्तम ॥ २८ ॥ जीरूपाहं स्थिता भूप वात्सं
कृत्वा स्वभावजम् ॥ सकलाऽऽधरूपेणौषधयस्ते ददाम्यहम् ॥ २९ ॥ दोहकः कल्पनोशी
घ्रं न दासर्वेऽडमं भवेत् ॥ अन्यथा मां महीपाल हनिष्यसि वृथा कथम् ॥ ३० ॥ तस्या वचनमाक

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



रुपिधनुःकोष्ठानुपोनमः॥पर्वतादीन्नुचूर्णासोमंभूमिंचकारह॥३१॥पुरग्रामादिकानानारच
नारचितातत:॥तेनैवपृथुनादक्षयथायोग्यधरातले॥३२॥तदादिनगराद्याश्चरचनासप्र
वर्त्तिता॥पुत्रीत्वेसधरांचक्रेपृथ्वीनाम्नीततोऽभवत्॥३३॥मनुंवत्सतत:कृत्वादोहकश्चो
भवत्स्वयम्॥षड्रसान्नमयंदुग्धंदुदोहतेजगद्धुपरमाधना॥३४॥तत:सर्वेत्रिलोकस्थाद
ुहुस्तांवसुंधरां॥स्वस्वान्नमयदुग्धंतेजग्रहुःपरमादृता:॥३५॥ब्रह्माणांवेदरूपंसवत्सदा
त्वाबृहस्पति:॥दोहकोदुग्धमादाश्चसंस्थितोविगतज्वर:॥३६॥इंद्रवत्सतत:कृत्वादो
हकपिघ्रितात्मकं॥कलाग्निरुद्रसंरक्षदुदोहरुद्रजीवनं॥३७॥विष्णुवत्संसमादायजगो
नेदोहक:॥यज्ञाधारमयंदुग्धंदुदोहकर्मसंभवं॥३८॥सूर्यवत्संचकारापिदोहकोध्रुव

श्रीः ७०

जा१



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

आदरात्॥ ज्योतिषां वै जौनं दुग्धं दुग्धेऽस्य कल्पतः॥३८॥ शेषं वत्सं च संगृह्य दुग्धे हवाहुकिः स्व
यं॥ सर्पाणामन्नरूपं वै दुग्धं दुग्धप्रियस्ततः॥४०॥ शिवं वत्सं प्रकल्प्यैव दोहको नंदिकेश्वरः॥ विधा
तैकं महादुग्धं दुग्धे गतमत्सरः॥४१॥ एवं सर्वे दुदुहुस्तां भूमिं गोपृथुभाविताम्॥ चराचरमया
जीवाईश्वराश्च प्रजापते॥४२॥ पृथुस्तां पूजयामास धरणीं धरणीप्रियः॥ पुत्रित्वे कल्पितां
धीरान्मास्थितामुदितां तथा॥४३॥ एवं दुग्धाधरित्रीं स पृथुः पृथुपराक्रमः॥ राज्यं चकार नीति
ज्ञः पृथिव्यामेकराट् स्वयम्॥४४॥ ततो यज्ञांश्चकारासौ शतसंख्यान्महाबलः॥ अश्वमेधाभिका
ख्यान्बाहूरिदक्षिणान्पुनः॥४५॥ तस्य यज्ञे स्वयं ब्रह्मा विष्णुः शंकरएव च॥ इन्द्राद्या आययुः स
र्वे गंधर्वाद्या महामते॥४६॥ ऋषयः कश्यपाद्यास्त्रयो याद्या नागमुख्यकाः॥ जैनानां नौवि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



धानगमुः सस्त्रिका श्चविशोषतः ॥४७॥ शतेयज्ञेसमारब्धे शक्रश्चिंतादरोभवत् जटाचीरधरोभूत्वा
तस्याश्चंसहसाहरत् ॥४८॥ तस्यपुत्रेरासंदृष्टस्तपस्वीतेनमोचितः ॥ हयंन्यक्षाभयोद्विग्नोंत
र्धानंसचकारह ॥४९॥ पुरनारस्त्रिधरीभूत्वाभस्मांगलेपकारकः ॥ जेहारश्वंपृथुः पृथुपराक्र
मः ॥५०॥ एवंबहुरमश्वंससंजहारपुरंदरः ॥ ततस्तंहंतुमुद्युक्तः पृथुः पृथुपराक्रमः ॥५१॥
तंब्रह्मासांत्वयामासमहेन्द्रंजेघानह ॥ एकोनंशतयज्ञानसचकारतेजसायुतः ॥५२॥ ब्रह्म
णानोदितःसाक्षाद्विद्वःतंप्रणामह ॥ पृथुवैरंसमुत्सृज्यदेवेन्द्रंतंप्रसस्वजे ॥५३॥ सकलाः
पूजितास्तेनदेवाद्याःस्वस्वालयंययुः ॥ सोपिराज्यंस्वधर्म्मस्थश्चकारपालयन्प्रजाः ॥५४॥ इति
श्रीमदांत्ये पृथुप्रशीवरीनंनामचतुर्विंशोध्यायः ॥२४॥ श्रीः ॥ मुद्गलउवाच ॥ जेनानांध

श्रीः ७१

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मिमागिसोशीक्षयन्नृपसत्तमः॥विष्णुरूपंस्वयंसाक्षाद्विष्णुतुल्यपराक्रमः॥१॥संस्थितः
स्वपुरेराजालोकान्संजयन्प्रभो॥तत्राजग्मुश्चयोगीन्द्राःसनकाद्याविधेःसुताः॥२॥च
त्वारःसूर्य्यसंकाशाःसदाबालवयोचिताः॥पूर्वेषांपूर्वजामान्यागतभ्रांतयएवच॥३॥तांदृ
ष्ट्वासहसोत्थायसंभ्रमेणनृपोत्तमः॥ननामदंडवद्भूमौशिरस्याप्योद्धिसन्निधौ॥४॥
उत्थायतामहाभक्तापाद्यार्घ्यविशुद्धिभिः॥पपूजविधिवद्भक्त्याहर्षितोऽत्यंतभावतः॥
५॥पादसंबाहनंतेषांचकारस्वयमादरात्॥उवाचमधुरंवाक्यंपृथुर्वाक्यविशारदः॥६॥
प्रथुरुवाचधन्योयंधरणीत्वद्धन्यंनगरमुत्तमं॥मंदिरंसत्कृतंसर्वंभवतामागमेनमे॥७॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



धन्यो वंशो कुलं धन्यं पितरौ च नमाश्रमः ॥ नोपि दिक्षेमे च भवतां पाददर्शनात् ॥ ८ ॥ स
नाथो हं कृतो नाथा भवद्भिर्नीत्रसंशयः ॥ अनुग्रहकृतो त्यंतं दयालुभिर्विशेषतः ॥ ९ ॥
पूर्वजन्मार्जितं मे किं कस्यचित्पुण्यमुत्तमम् ॥ अन्यथा दर्शनं न स्याद्भवतां ब्रह्मरूपिणां ॥
१० ॥ निस्पृहा योगनिष्ठाये सर्वज्ञाः स्वपरापराम् ॥ दृष्ट्वा कुर्वंति कार्यं धर्माज्ञानस्य हिता
य च ॥ ११ ॥ आत्मज्ञा महाभागा मम कुर्वंतु सांप्रतं ॥ न दाहं कृतदास्यं च भवतां भिन्नसंश
यः ॥ १२ ॥ मुद्गल उ ॥ पृथ्वीवचनमाकर्ण्य सनकाद्यास्तमब्रुवन् ॥ तत्प्रभावेन तस्याच
योगींद्रा योगभाविताः ॥ १३ ॥ सनकाद्या ऊचुः ॥ धन्योसि नृपवर्य्यत्वं प्रजाः प्रत्युपरा
कृम ॥ विनयं ते प्रदृष्ट्वैव तुष्टा वयमादरात् ॥ १४ ॥ न कार्य्यं विषयायुक्तं पर्यन्नग्ना

श्री: ७२

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

महामते॥ दर्शनार्थं चतेयातः साधोस्वैः श्रुतं यशः॥१५॥ आज्ञां देहि गमिष्यामो ब्रह्म
लोकं सनातनम्॥ कीर्तिं श्रुत्वा यथादृष्टं प्राहर्षसमन्वितः॥१६॥ तेषां तद्वचनं श्रुत्वा
प्रयुस्तान्विनयान्वितः॥ जगाद भक्तिसंयुक्तो योगीन्द्रो नृपसत्तमः॥१७॥ प्रयुरुवाच॥ भुक्तं
राज्यं महाभागा नाना भोगसमन्वितम्॥ अधुना सोऽस्ति सिद्ध्यर्थं योगं कुर्त्तपोधनाः॥१८॥
प्रयोर्वचनं सत्यं नं श्रुत्वा योगिभिरादरात्॥ पार्थं दृष्ट्वा महाभागा ऊचुस्तं ब्रह्मशाश्वतं॥१९॥ स
नकाद्या ऊचुः॥ धन्योसि नृपशार्दूल बुद्धिस्ते परमाद्भुताम्॥ निर्वेदं राज्यभोगेभ्यः संप्रा
प्तः प्रयुत्तश्रवः॥२०॥ योगशांतिमयं पूर्णं गतो शांतिं विद्धि भूमिप॥ तं भजस्व महाभाग्यात्तया
शांतिं गमिष्यसि॥२१॥ एकदास्मवयं सर्वे संगताः शंकरालये॥ वरमूले समासीनं पश्या

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





नसंस्थितम् ॥२२॥ तंप्रणम्याश्रिताः सर्वे वयंविनयसंयुताः ॥ स्तोत्रैस्तंबोधयन्तश्च ततः
शिवोबुबोधवै ॥२३॥ त्यक्त्वाध्यानंगणेशायनमोवदंतमादरात् ॥ श्रुत्वाभ्रान्तावयंतस्म
पृच्छामःसंशयान्विताः ॥२४॥ कोसौगणाधिपःस्वामिन्नमसितंकथंप्रभो ॥ शिवःसह



जरूपस्त्वंस्वाधीनःसततंमनः ॥२५॥ अस्माकंवचनंश्रुत्वाशिवोहर्षसमन्वितः ॥ जगाद
ज्ञानमाद्यंयज्ज्ञानापत्यंसुशांतिदम् ॥२६॥ श्रीशिवउवाच ॥ ब्रह्मयत्कथ्यतेवेदैस्तत्रकथ्ये
प्रवर्त्तते ॥ स्वाधीनंसहजंविप्राःपराधीनंविधाभवम् ॥२७॥ कर्मयोगादिभेदेनवेदेषु
वेदवादिभिः ॥ नानाविधंवर्णितंयद्ब्रह्मतन्नासयान्वितम् ॥२८॥ कर्मणांसंकल्पानां
संयोगोब्रह्मणोजायते ॥ तेनकर्मात्मकंब्रह्मतद्ज्ञानादिकंमतं ॥२९॥ समूहात्मकशा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दश्च गराइत्यादि धीयते ॥ बाह्यांतरादिभेदानां संयोगे समूहो मतः ॥३०॥ अन्नप्राणादिकाः
शक्तब्रह्मणो वाचकामतः ॥ ते सर्वे गणरूपाश्च तेषां स्वामी गणेश्वरः ॥३१॥ संयोगायोगक
धाये नानायोगा मता बुधैः ॥ योगानां योगरूपो यं गणेशो नात्र संशयः ॥३२॥ गणो योगात्म
कः प्रोक्तस्तस्मात्तस्य गणाव्ययम् ॥ योगरूपा विशेषेण नमामि भक्तिसंयुतः ॥३३॥ मया
विघ्नात्मिकाः प्रोक्ता भ्रांतिदा बिंबभावतः ॥ तां ये जेतुं न नाईशा विघ्नराजस्य सेवया ॥३४॥
ब्रह्मभूता भवंति ते योगीन्द्रगणपाः स्मृताः ॥ अहं गणेशरूपो वै भिन्नं मायामयं मतम् ॥३५॥
चिंतयेच्च विप्रोक्तं मा बुद्धिर्विविधात्मिका ॥ तत्रैश्वर्यं यत्प्रोक्तं सिद्धिस्तापरमाद्भुता ॥
इद्धि ॥ तत्रयद्विभावेन गणेशः प्रतिपत्तिवृत्ति ॥ मायाभ्यां भोक्तितोत्यंतं सर्वत्रापि विराजते ॥३७॥

पं २

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



विधीभावं परित्यज्य गणेशस्य वशे वया ॥ पंचधा चिंतयन्ते ज्यस्वयं चिंतामणिर्भवेत् ॥ ३८ ॥
गणेशोऽयं दाविप्रास्तदा कुत्र प्रवर्तते ॥ संयोगो मेलनं योगः शांतियोगं तलेभिरे ॥ ३९ ॥ अभिन्नो
ऽयं कदाकस्माद्गणेशः शात्रमेव यः ॥ योगीन्द्रः शांतियोगेन ब्रह्मभूतो भविष्यति ॥ ४० ॥ एतद्
वै मदीयं यद्ध्यानं प्रकीर्तितम् ॥ अतो गणेशदासोहं तन्नामा सिद्धिदायिनः ॥ ४१ ॥ एवमु
क्त्वा महायोगी विरामस्तशंकरः ॥ उच्चिन्नसंशयो राजा नः सनेकाद्यावयं नृप ॥ ४२ ॥ विचरामो
महीमेतां स्वर्गेषु विवरेषु च ॥ योगमार्गेण योगीशा गणापत्यास्तभावतं ॥ ४३ ॥ गणेशदर्श
नेजाता स्तत्सावयमादरात् ॥ तस्मिन् कालेऽगणाधीश कस्यपस्याश्रमो भवत् ॥ ४४ ॥ काशीरा
जो महाभैक्षो गणापत्यपरायणः ॥ तस्यगृहे गतो देवः स्वकीयाचार्य्यसंध्यनात् ॥ ४५ ॥

श्री॰ ७४

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दर्शनार्थं वयं तत्र गताः काश्यां महामुने ॥ दर्शयामो ~~[illegible]~~ गणेशं ब्रह्मचारिस्वरूपिणम् ॥ ४६ ॥
ते प्रणम्य वयं राजन् स्थिता भक्त्या समन्विताः ॥ बालरूपधरं देवं स्तौमः स्म वोऽपृथग् ॥ ४७ ॥ सन
काद्या ऊचुः ॥ नमो विनायकायैव कश्यपप्रियसूनवे ॥ अदितिजठरोत्पन्न ब्रह्मचारिन्नमोऽस्तु ते ॥
४८ ॥ गणेशाय सदा मायाधारायैव दिवार्जित ॥ भक्तहीनाय वै तुभ्यं हेरंबाय नमो नमः ॥ ४९ ॥
त्वं ब्रह्म शाश्वतं देवं ब्रह्मणां पतिरंजसा ॥ योगायोगादिभेदेन क्रीडसे नात्र संशयः ॥ ५० ॥ आदिमध्यां
तरूपाद्यः प्रकृतिः पुरुषस्तथा ॥ नादानंदौ च सूक्ष्मस्त्वं स्थूलरूपो भवान्प्रभो ॥ ५१ ॥ सुरासुरमयः
साक्षान्नरनागस्वरूपधृक् ॥ नेत्रस्थ्यादिभेदेन शोभसे त्वं गजानन ॥ ५२ ॥ सर्वेभ्यो वर्जितं
त्वं वै मायाहीनः स्वरूपधृक् ॥ माया मायिकरूपश्च कोऽजानाति गतिं पराम् ॥ ५३ ॥ कथं स्तौमो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हि वृष्णिकुलोद्भव ३४ एवमुक्तो महातेजाः कृष्णस्तं प्रत्यवाचह कुरूत्वं भ्रातृभिः सा
र्द्धं गणेशो पासनं स्त्रिया ३५ सत्यासत्य समानाव्यक्तं चनर्द्धं च भौ प्रभुः स्वानंदवासक
र्त्ता सावस्माकं कुलदैवतं ३६ एवमुक्त्वा ददौ तस्मै मंत्रं दशाक्षरं प्रभुः सविधं हर्षसंयुक्तः
सर्वसिद्धिकरं परं ३७ माहात्म्यं व्रतजं तत्र श्रावणमासके शव. युधिष्ठिरस्य सर्वे पु
ण्यदं भ्रांतिनाशनं ३८ चतुर्विधप्रदं पूर्णं सर्वदोषं मतं व्रतं कृते चेत्कर्मजं सर्वं सफ
लं भवति प्रभो ३९ तव राज्ये व्रतं मुख्यं नष्टं तेन माहामते राज्यभ्रष्टश्च संजातश्चतुः
पदविवर्जितः ४० श्रुत्वा सुविस्मितो राजा युधिष्ठिरो महायशाः गणेशं मनसि
ध्यात्वा चरकाविधिसंयुतः ४१ तत्रादौ श्रावणे मासे प्राप्ते संकटनाशिनी च
तुर्थी कृष्णपक्षे तां साधयामास सानुजैः ४२ अकृ कृष्णचतुर्थी जं व्रतं चक्रु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





श्च पांडवाः सस्त्रीकास्ते नते सर्वे वने षु सुखिनो भवन् ४३ पुनः स्वराज्य
कर्तारो बभूवुश्च सुयोधनं हत्वा सर्वे नृपैर्युक्तं कृष्णेन हर्षसंयुताः ४४ पुनस्ते नृप
थिव्यां तद्विख्यातं प्रकृतं व्रतं सर्वे जनास्ततश्चक्रुः शुक्लकृष्णचतुर्थ्यजं ४५
दृष्ट्वा भुक्त्वा खिलान्भागान्यौत्रांडयभिषिच्यते पांडवाज्ञानसंयुक्ताः स्वांशेषु संमत्ता
बभूः ४६ अन्ये जनाः क्रमणैव गत्वा गणेश्वरं पदं तत्र गणेश्वरं दृष्ट्वा ब्रह्मभूता ब
भूविरे ४७ एवं व्रतस्य महात्म्यं कश्चित्ते नृपोत्तम अन्यच्छृणु महाभाग
महापुण्यप्रदं परं ४८ कर्णाटेकारुकः कश्चिन्महापापपरो भवत् वने षु शस्त्रधा
रीसज्जनान्जघान नित्यदा ४९ परस्त्रियं तथा तत्र दृष्ट्वैकाकिनीमाटणात् अस्त्र
मद्रदसंयुक्तो बलेन समहाखलः ५० गोवधादिकमेवं स ब्राह्मणानां च हिंसनं



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चकारदुष्टभावेनद्रव्यार्थंमांसकारणात् ५१ एवंनित्यंवनेगत्वापापंचकारदुर्मतिः
चौर्यग्रामेजनानांजघ्नेद्रव्यंगत्वाविशेषतः ५२ कदाचित्सवनेगत्वागुहायांसंस्थितो
भवत् जनान्हंतुंमहाचोरस्तत्रावृष्टिर्बभूवह ५३ अतिवृष्टिप्रभावेणनद्योजलैश्च
पूरिताः यत्रतत्रजलंपूर्णंगंतुंमार्गोनविद्यते ५४ वृष्टिभयेनतत्रैवसंस्थितः क्षुधि
तानृपदैवयोगेनसदेवीचतुर्थीतिथौ ५५ श्रावणेकृष्णपक्षेसाप्राप्ता तस्या
व्रतंशुभं कृतंतेनसुदुष्टेनत्यन्तहीनप्रभावतः ५६ चंद्रोदयेसमुत्पन्नेजलेनावातमा
दरात् फलंचनारिकेलंयत्तद्भंजबभक्षसः ५७ निशाशेषबहिःपापीनिःसृतस्तत्र
चाययौ व्याघ्रस्तंगत्वाहत्वासबभक्षक्षुधितोभृशं ५८ ततस्तंगाणपागत्वापयः
स्वनंदकेपुरे ब्रह्मभूतमयंतत्र चक्रुर्व्रतप्रभावतः ५९ महापापीव्रतेनैवाज्ञानजे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नन्पात्मज ब्रह्मभूतोबभूवाथवर्णयेकिंमहाभुतं ६० नानाजनाव्रतेनैवभुक्तिभो
गान्मनेप्सितान् पयःखानंदवेतत्रवर्णितुंनप्रभवामते ६१ इदंश्रावणकृष्णयाश्चतु
र्थ्यावर्णितंपठेत् माहात्म्यंशृणुयाद्योवाभुक्तिमुक्तिसविंदति ६२ इतिश्रीमहापुराणेमो०
चतुर्थ० ग० श्रावणकृष्णचतुर्थीमहात्म्यंनामषडविंशोध्यायः २६ दशरथउवाच
भाद्रकृष्णचतुर्थ्यास्तुमाहात्म्यंवदमोमुने नरूप्यामिकथांश्रृण्वन्सर्वसिद्धिप्रदायि
नीं १ वसिष्ठउवाच० द्वाविंशोराजराजादृष्टोबभूवपरमक्षतिः वीरसेनोयशोयुक्तःसा
र्वभौमोमहाबलः २ नीतिज्ञोनीतियुक्तश्चचकारराज्यमुत्तमं सर्वान्राज्ञोवशेकृ
त्वाकरभारेणसंयुतान् ३ धर्मशीलःसदानंचाददत्सभक्तिसंयुतः कृधिनंनन
रंनारीमसहत्सुखकारकः ४ पुत्रानिवप्रजाःसर्वाःपालयामासयत्नतः अ



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पुत्रोदैवयोगेनबभूवपरवीरहा ५ पुत्रार्थंयत्नमत्यंतंजपहोमादिभिःसदा [illegible]
[illegible] तीर्थक्षेत्रविधानेनचकारतादृशोभवत् ६ एवंबहुगतेकाले पुत्रोनासी
न्महीपतेः ततोहिदुःखितोराजाराज्यं त्यक्त्वायौवनं ७ सस्त्रीकःसवनेराजाव
भ्रामयचतत्रह ततोमहावनंगत्वापपातक्षुधयान्वितः ८ तत्रमुनंतुविप्रर्षिःस
मि [illegible] र्थंसमाययौ नृपंदृष्ट्वादयायुक्त आययौतंनिरीक्षितुं ९ वेदवेदांगवित्साक्षात्
सर्वशास्त्रप्रवर्तकः पुराणज्ञोमहायोगीव्यासशिष्यःप्रतापवान् १० तंदृष्ट्वासहसो
त्थायप्रणनामसमहामुनिं वीरसेनःसहर्षेणसंयुक्तःसस्त्रीकोनृप ११ उत्थाय संपूजं
कृत्वाकरंपुरोमहामुनेः तंजगादविशेषज्ञंराजावचनमुत्तमं १२ वीरसेन उ० धन्यं
मेकर्मजन्मापिपितामाताकुलंयत्राः विद्याप्रत्तादिकंसर्वंतदंघ्रियुगदर्शनात् १३

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



राज्यंत्व त्कवनेसंस्थः पुत्रार्थीपापवानहं तत्रेतद्दुःखं प्राप्तंपूर्वपुण्यफलोदयात्
१४ नानापत्नेनविप्रेण पुत्रोमेनाभवत्किल त्वत्कृपोपायमेकंचपश्यामिसुखदायकं
१५ वसिष्ठउवाच एवंतस्यनृपस्यासौप्रत्यावचनमुत्तमं संतुष्टस्तंजगादेदं सुमंतुर्मुनि
सत्तमः १६ सुमंतुरु० माचिंतांकुरुराजेंद्र पुत्रस्तेकुलतारकः भविष्यतिनसंदेहः शृणु
मेवचनंहितं १७ राज्येनष्टंत्वदीयेन हृतंचतुर्थेऽंशमहृत् तेनत्वंपुत्रहीनोसिनृपाध
मनबुध्यते १८ सर्वादोत्तद्धृतंमुख्यंकर्तव्यंसर्वसिद्धिदं चतुःपदार्थदंसर्वंनोचित्स
र्वंसुनिष्फलं १९ त्वयाकर्मकृतंनानापुण्यंदंसर्वसंमतं चतुर्भिःपुरुषार्थैस्तद्धा
नंचतुर्थेवर्जितं २० एवमुक्त्वा [illegible] नृपायाथमहात्म्यंव्रतजंमहत् श्रावयामासमा
पितंश्रुत्वापप्रच्छभाविकः २१ वीरसेनउवाच वदब्रह्मन्गणेशस्यज्ञानंयस्य च



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तुः प्रदं व्रतं सर्वादिसंमान्यं तं भजिष्यामि नित्यदा २२ सुमंतुरुवाच० गणेशस्य स्वरूपं य
द्वक्तुं शक्तो भवेन्नकः नुपाधिसंयुतं ज्ञानं शृणु राजेंद्र सर्वदं २३ अहंतपः प्रभावेण प्रा
राजा तो विशेषतः शापानुग्रहणे राजन् समर्थः सर्वमंडले २४ ततो तिन तपसा पुक्तो भवं
तेन महामते अंतर्ज्ञानं समुत्पन्नं तत्र दृष्टा विशिष्टतास्य हं २५ ततो जडादिका नाना भूमै
यैः साध्यं तत्तः नानाब्रह्मविभेदेषु संस्थितो ब्रह्मधारकः २६ एवं क्रमेण राजेंद्र अस
त्स्वानंदगो भवं तत्र शांति सुखे सक्तो ब्रह्मभूतस्वभावतः २७ तस्मा द्वै दृ मयं दृं दृ दृ
शांतो महामुनिं व्यासं गत्वा प्रणम्यैव पृच्छेत्स्व हितप्रदं २८ ब्रह्मभूतस्वरूपं मे वद शो
तिमहामुने शिष्योहं ते महाभागतारयास्व भवार्णवात् २९ इति पृष्टो महायोगी मा
मुवाच महर्षितः ततो हं कथयिष्यामि गणेशज्ञानकारकं ३० व्यासउवाच शृणु

मीरः ४

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





पुत्रप्रवक्ष्यामिब्रह्मभूतस्वरूपकं शांतीनांशांतिरूपं तज्ज्ञातव्यंयोगसेवया ३१ स्वतनु
स्थानकंब्रह्मपरनोस्थानकंतथा तयोरभेदभावेयद्सत्स्थानंदनु च्यते ३२ तत्रामृ
तमयंपतत्सद्रूपंस्वस्वरूपकं तयोर्भेदभावेचानंतःस्थानंदनुच्यते ३३ त्रिभिर्हीनंत्रि
भिर्युक्तमव्यक्तंब्रह्मकथ्यते चतुर्णामेवसंयोगोस्थानंदोब्रह्मनुच्यते ३४ पंचभिर्गति
हीनंयद्योगवाचकंमतं नतत्रकस्यचिद्योगस्तस्यकुत्रापिपुत्रक ३५ संयोगा
योगयोर्योगो योगःशांतिप्रदायकः तद्वैगणराजःसज्ज्ञातव्योविबुधैःसदा ३६ ग
णां समूहरूपाश्चवात्यांनगदियोगतः अन्नादिब्रह्मरूपास्तेज्ञातव्यायोग
सेवया ३७ तेषांस्वामीगणेशानस्तंभजस्वविधानतः तदात्वंब्रह्मभूतश्चभविष्य
सिनसंशयः ३८ चित्तंपंचविधंप्रोक्तंतद्देवबुद्धिवाचकं चित्तमोहस्वरूपंयसिद्धि



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रूपं वदति चं ३९ तयोः स्वामी गणा [illegible] धीरो मायाभ्यां क्रीडति प्रभुः पंचचित्तनिरोधे
नलभ्यते चित धारकः ४० अत चिंतामणिः प्रोक्तो वेदेषु पत्रपुत्रक चिंतयत्कामसमो
हं त्वं भव चिंतामणिस्ततः ४१ एवमुक्त्वा ददौ मंत्रमेकाक्षरं प्रभुः सविधं तं प्रणम्यैव
गतोहं स्वाश्रमे पुनः ४२ ध्यात्वा गणपतिं राजन्मंत्रजपपरो भवं ततः स्वल्पेनकालेन
शांतिं प्राप्तोहमेव च ४३ तथापि गणराजं तं पूजयं विशेषतः ततो मे दर्शयामास स्व
त्मानं विघ्नपः प्रभुः ४४ समागतं गणेशानं दृष्ट्वा विस्मितमानसः अपूजयं महर्षे प्रण
म्य तं पुनः पुनः ४५ अथ वेपनिषद्दः ससंस्तुतो गणनायकः भक्तिं दृष्ट्वा स्वकीयां
मे तद्दानं प्रचकार ह ४६ तदादि गणपस्योहं भजामि नित्यमादरात् तं भजस्व महा
राज ततः सर्वं शुभं भवेत् ४७ एवमुक्त्वा ददौ तस्मै मंत्रं सषोडशाक्षरं सविधिं मुनिमु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



ख्यः सोंतर्द्धानमगम ततः ४८ राजा तिविस्मितो भूत्वा सपत्नीकः प्रणम्यतं स्वपुरे सस
मागत्य भजन्तं गणनायकं ४९ तत्रा हौ भाद्रमासे सा कृष्णा प्राप्ता चतुर्थीका तां कृ
तेन जनेन सर्वैः पुरवासिभिरादरात् ५० ततस्तेन प्रशस्तं तद्व्रतं कृतं विशेषतः प्युकृ
ष्टं चतुर्थ्यां च चक्रुः सर्वे धरातले ५१ व्रतपुण्यप्रभावेन राजा पुत्रसमन्वितः बभू
व रोगहीनास्तेजनास्तथैव भूपिप ५२ पुत्रे राज्यं परित्यज्य राजा निवृत्तिसंयुतः स
पत्नीको गणेशानं भजन्नित्यमादरात् ५३ अंते गणेशलोके स गत्वा ब्रह्ममयो
भवत् क्रमेण सर्वलोकाश्च ब्रह्मभूता बभूविरे ५४ एतत्ते कथितं भूप माहात्म्यं स
कटीभवं अन्यच्छृणु चतुर्थ्यास्त्वं पापघ्नं सर्वदं परं ५५ अंगे च धीरः कश्चिद्ब ध्र
भूव सर्वहिंसकः बाल्यात्प्रभृति रत्यंतं पापकर्मपरायणः ५६ दृष्ट्वा सा कृपपरो भूत्वा



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कलहंसोकरोन्निश्चयः लोकानांलोभशीलश्चचौर्यद्रव्यंसमाददत् ५७ वनेगत्वाम
हापापीमार्गस्थान्राजघातनये ब्राह्मणादीन्विशेषेणनानापापपरोभवत् ५८ न
तस्यकर्मवक्तुंवैराक्षसेपापभीतिनः ग्रंथबाहुल्यतोभूपपरस्त्रीलालसोभवत् ५९
एकदावनमध्यस्थोभाद्रकृष्णचतुर्थीदिने वेलेप्राप्तेमहापापीनिराहारोबभूवह
ई० अकस्मात्तत्रसंप्राप्तोजनसंघोमहानृप भयात्तस्यप्रलीनोभूद्गुहायांधीव
रःसतु ६१ किंचिद्दिनावशेषेसजनसंघोगतोभवत् तदाबहिर्विनिःसृत्यगृहेतु
मनोदधे ६२ नप्राप्तंतेनदृष्टंनकिंचित्तदपिदारुणः स्वात्मनिधैर्यमास्थापमार्ग
संस्थावभूवह ६३ रात्रौसमागतोदृष्टःस्वगृहेराजसत्तम "चंद्रोदयेसुप्तेः सा
हूंभोजनंसचकारह ६४ पंचम्यांसर्पदृष्टेनमृतः पापेषुनिश्चयः तदपिगणराज

गं४

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



स्यदूतानेतुंसमागमन् ६५ गृहीत्वा धीवरंतेनुगताः स्वर्वटकेपुरे गणेशानंसतं
दृष्ट्वा ब्रह्मभूतो बभूवह ६६ अज्ञानवत्तेनायंविधिहीनेनभूमिप ब्रह्मभूतो धी
वरश्च बभूवकिंवदामिरां ६७ एवंनानाविधाराजन्ब्रह्मभूताबभूविरे चतुर्थ्या
व्रतपुण्येनवक्तुंनैवप्रशक्यते ६८ इदंभाद्रपदेकृष्णचतुर्थीरजंशृणोतियः पठति
वापिमाहात्म्यंसर्वसिद्धिमवाप्नुयात् ६९ इतिश्रीमहापुराणेमौद्गले० च० ग० भाद्रकृष्ण
चतुर्थीमहात्म्यंनामसप्तविंशोध्याय २७ दशारथउवाच वदब्रह्मन्माहात्म्यं
यदाश्विनेकृष्णगंमहत् चतुर्थीरजंविशेषेणनक्तोहंभवामिवै १ वसिष्ठउवा०
इतिहासंप्रवक्ष्यामि सर्वसिद्धिप्रदापर्वं अत्रतेनमहाराजशृणुतस्तोभविष्यसि।
२ पार्वतीशंकराभ्यांचतपसाराधितोभवत् दिव्यवर्षसहस्रेणगणेशः प



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रतांगतः ३ कार्तिकेयस्तथाज्ञातः स्वकार्यास्नेहकारकः ततश्चाप्रीतिरुत्पन्ना गणे
शोचत्तयोरभूत ४ कार्तिकेयोगणेशानंस्वदूतेनित्यमादरात विवाहोमेपुराणश्च
वापिस्मभविष्यति ५ एवंस्वदूतपत्नीवीक्ष्यपुत्रयोः पार्वतीशिवः विचारंचक्रतुस्त
त्रविवाहार्थमहामते ६ अथविघ्नेश्वरः साक्षाद्दूतरूपोनसंशयः शुभितश्च
तदभ्रष्टंकरिष्यति विशेषतः ७ साक्षात्सुत्रःमुत्पन्नःस्वंदूतंत्यज्यविघ्नपं ज्येष्ठं
विवाहयेच्चेद्वासेनानीःक्रोधितोभवेत ८ स्वपुत्रंत्यज्यसेनानींविवाहोनैवशो
भते अतःकपटरूपेणकर्तव्यंकार्यमुत्तमं ९ ततःशिवोगणेशानंस्वदूतंचैवाग्रेवी
दूत्वः धराप्रदक्षिणांकृत्वाय आदौसुसमागतः १० पूर्वंविवाहकंतस्यकरिष्या
मिनसंशयः ततस्तंगणनाथस्तुजगादवचनंहितं ११ ज्येष्ठंमांकिंपरित्यज्यवद

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



सिद्धांकरप्रभो वेदहीनंतथास्तुमेभवदाज्ञांकरोम्यहं १२ स्कूलदेहध्रोहंमेवाहनं
मूषकोमतः पृथ्वीप्रदक्षिणंकर्तुं नराक्षोमिसदाशिव १३ एवमुक्त्वागणाधीशः
स्वगृहेसंस्थितोभवत् स्कंदोमयूरमारुह्यजगामहर्षसंयुतः १४ पृथ्वीप्रदक्षिणा
यांसरतःस्कंदःसवेगवान् गणेशोमायया तत्रचकारकौतुकंमहत् १५ पार्व
तींशंकरंपूज्यप्रदक्षिणांचकारसः उवाचशंकरंतत्रविवाहोमेविधीयतां १६
मातुःपितुःकृतायेनप्रदक्षिणासदाशिव पृथ्वीप्रदक्षिणातेनकृताशास्त्र
नसंशयः १७ श्रुत्वागणपतेर्वाक्यंपितःशंकरोब्रवीत् करोमितेविवाहंवै
क्रोधंमाकुरुपुत्रक १८ ततएकांतगंशंभुंपार्वतीप्रेमविह्वला उवाचकार्त्तिके
यंकिंत्वज्यदुर्द्धिःप्रमानितः १९ ततस्तांशंकरोवाक्यंजगादशृणुपार्वति अयं



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कुटुम्बसर्वस्वं हरतिनात्रसंशयः २० अतः स्नेहं परित्यज्य परश्वधर्मसनातनं नायंपु
त्रो महादेवि ब्रह्मभूतः सामागतः २१ एवमुक्त्वा सतीं शंभुर्विवाहमकरोत्तरः ग
णेशस्य विधानेन तद्दयेन विदूयता २२ सिद्धे विवाहके पूर्णे कार्त्तिकेयः समागतः
तत्र विघ्नकरो विघ्नं चकार परमाद्भुतं २३ नारदः सहसागत्य कार्त्तिकेयमुवाच ह
विवाहकृत्यमेतस्य पित्रा मात्रा कृतं पुरा २४ यद्दित्वा वंचसेनानी कृतं कर्म जुगुप्सि
तं नावलोकयमुखं मातुः पितुश्चापि कयाचिदा २५ एवमुक्त्वा गतो विप्रो नारदः
कलहः प्रियः खं दीर्घनिःश्वस्य तस्मात्स पयोष्णीं शैलपर्वतं २६ ज्ञात्वा पुत्रस्य वृत्तां
तं पार्वती शंकरः पुनः तदर्थं तत्र शैलेतौ गतौ ज्ञात्वा पपालसः २७ क्रौंचेस्कंदं
स्थितं राजन् ज्ञात्वा पार्वती शंकरौ शोकसंविग्नचित्तौ तौ विलापं चक्रतुः पुरा २८ न

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



आजगाम विप्रेंद्रो मुद्गलः सर्वमुद्गलः तं दृष्ट्वा सहसोत्थाय पूजयामास तं मुनिं २ सुखा
सीनं महादेव उवाच शोकसंकुलः भगवन्सर्वतत्त्वज्ञ वद मे शोकभञ्जनं ३० स्कंदसं
योगदं पूर्णमुपायं तत्करोम्यहं रुरोद पार्वती तत्र तेनैतां मुनिरब्रवीत् ३१ मुद्गल उवा० त३
शृणु मे शृणु महाभाग त्वं सा शक्तिः सर्वविस्मयः विद्या रूपे पमाद्या सा शक्तिः सर्वार्थदा
यिनी ३२ तदपि कथयामि त्वां पुत्रो शास्त्र प्रकीर्तितौ द्विविधौ तत्र या प्राप्तं त्वत्समं
नैव दृश्यते ३३ योगाभ्यासेन विघ्नो ब्रह्मणां नापकः सतां। पुत्रः समाधिजः प्रोक्तश्चि
स्त:३ न्तामणिस्ततः ३४ देहः शक्तिमयस्तत्रात्मा त्वं पुरुष उच्यते तयोर्योगबलेनैव जन्मे
यते ब्रह्मपुत्रकः ३५ अर्द्धनारीश्वरस्त्वं च तस्माज्जातो गजाननः ब्रह्मभूतपदस्यासौ
पालको [illegible] नात्र संशयः ३६ भिन्ना शक्तिरियं ज्ञात्वा त्वं भिन्नदेहधारकः [illegible]



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भिन्नभावात्समुत्पन्नः पुत्रस्तस्कंदएवच ३७ देह
मौख्यकरः प्रोक्तः स्कंदः सर्वत्रसंमतः नृणांतिमौख्यकरश्चैवगणेशः पुत्रभावतः ३८ त
त्रचभिन्नभावेनमोहितोक्षिनसंशयः स्कंदस्नेहेनशंभोत्वमधिकंमन्यसेसदा ३९ नत
थाब्रह्म णि श्रद्धाधिकाविघ्नेश्वरे धनौत्तेनविघ्नसमायुक्तोजातोसिंभजस्वच तं ४
ब्रह्मणिस्नेहभावेनविषयान्निंदयन्स्थितः तदाविषयरूपास्तेस्वयंवशुभवंतिवै
४१ विघ्नेश्वरमनादृत्यस्कंदंविवाहसंपुतं आदौपशुपामिशात्त्वावेसंधृतंमानसेत्व
या ४२ तदेवनिष्फलंसर्वंकृतंविघ्नकरेणते विघ्नेशश्चसमुत्पन्नस्तस्मात्वंशरणंव्र
ज ४३ एवमुक्त्वामुद्गलस्तंजगामस्वेच्छयाचरन् शिवःशक्त्यायुतस्तत्रतेनसत्यमवत मन्य
त ४४ त्यक्त्वास्कंदभवंस्नेहंविघ्नेशमभजत्सदा तत्रदोसंकरोप्राप्तश्चिनीतांतो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



प्रचक्रतः ४५ मायां भ्रांतिकरीं सर्वां भिन्नभावप्रमोहतः सत्वाशौक्तिश्च शांतिस्तौ
तौ बभूवतुः ४६ कस्यपुत्रस्य कामाराधितो कोभमदापकं कृतं विघ्नेश्वरेणैव तमावां
शरणं गतौ ४७ ततो विघ्नेश्वरेणैव कृतं कौतुकमादरात् बुद्धिभेदमयं तत्र स्कंदस्य बुद्धि
धारणा ४८ अहो मया निमुर्खेण त्यक्तौ पार्वतीशंकरौ द्वेषं गणपतिं नित्यं स्पर्द्धया
मिमहाप्रभुं ४९ शक्त्या शिवेन विघ्नेशस्तपसाराधितो भवत् सोयं पुत्रस्वरूपेण व
भूववरदानतः ५० स्वानंदवासकारी च सिद्धिबुद्धिपतिः स्वयं योगशांतिस्वरूपोयं
मुक्तानामिनमूर्खवत् ५१ एवं [redacted] विचार्य स्कंदः सयपौ कैलासमा
दरात् आदौ प्रणम्य विघ्नेशं पूजयौ सभक्तितः ५२ अथ पर्वशिरसातं संस्तुत्वा ततः सदा शिवं
उमां संपूज्य तत्पादप्रणनामाथ दंडवत् ५३ संमानितः सतैः स्कंदो तिष्ठत भक्ति



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संयुक्तः तदा तावन्नगो भूत्वा नृपतियोगपरो भवत् ५४ विवाहार्थं शिवेनासौ प्रेरितस्तु
मुवाच ह स्त्रियं बंधक्रिंनाथेनेर्ष्यमिगणपेरतः ५५ अत्यागृह्य पुनः स्कंदो भक्तं
गणनायकं मायामुखं परित्यज्य तन्निष्ठः सुव भूवह ५६ एवं संकटहारिणपाश्चतु
र्थ्यां महिमाभूत कश्चितः नृपतिदः स्कंदसंमिल नकरो भवत ५७ अन्यच्छृणुम
हाभागचरित्रं पापनाशनं वंगदेशो द्विजः कश्चित्पापकर्मा बभूवह ५८ त्यक्त्वा
ब्राह्मणमार्गं समद्यपानरतो भवत् यवनीं समासाद्य यवनो भूत्महाबलः ५९
नाशयते मया तस्य कर्म पापमयं महत् कथने परदोषाणां दोषो भवति मा
नवः ६० कदाचिज्ज्वरसंयुक्तो बभूव तातिदूषणः तत्राश्विन भवा प्राप्ता कृष्णा च
तुर्थिका नृप ६१ तत्र तेन तु लान्तं च भक्षितं न भयान्नृप तं दुलानां तु लं पीतं चंद्रो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





दपेसुपक्कजं ६२ चतोबहुगतेकाले ममारयवनोद्विजः तंगत्वब्रह्मभूतंवैगणेशाश्च
क्रिरेनृप ६३ एतादृशामहापापाद्वनपुण्यप्रभावतः ब्रह्मभूताबभूवुश्चकाकथा
विधिकारिणां ६४ एवंनानाजनाराजन्भुक्त्वाभोगान्यथेप्सितान् ब्रह्मण्यंते
गतास्तेनवक्तुंमयानशक्यते ६५ इदमाश्विनजापाख्यंमहात्म्यंयः शृणोतिवा
पठतेकृष्णसंकष्टयाः सर्वार्थंलभतेनरः ६६ इतिश्रीमहांत्यमाकुले०च०गन्धा
श्विनकृष्णचतुर्थीमहात्म्यं नामाष्टाविंशोध्यायः २८ दशुरथउवा० कार्त्ति
केकृष्णपक्षेयाचतुर्थीसंकटामता माहात्म्यंवदतस्माकंसर्वपापहरंपरं १ वसि
ष्ठउवाच० अत्रतेकथयिष्यामिचेतिसंहापुरातनं महाराष्ट्रेमहातेजाराजाभूत्वाद
मामिदः २ वेदवेदार्थतत्वज्ञश्चधर्मनिरतोभवत् षष्ठांशंराज्यलोकान्सोपालयत्



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पुत्रकान्यया ३ ऊपारसेन यायुक्तश्चतुरंगप्रमोदया पूर्णकोशः कुबेराभः शास्त्रास्त्र
पारगोबभौ ४ स्वबलेन नृपान्सर्वान्वशे कृत्वा महाबलः चकार वशगां पृथ्वीं समुद्र
तांविशेषतः ५ करदाद्तेरसर्वैराज्ञानसेवकाइव सामंताश्च महाराजनस्याज्ञावश
वर्तिनः ६ पुण्यवान्धर्मशीलश्च नानादानपरायणः देवविप्रातिथिप्रेप्सुः स्वदार
निरतोभवत् ७ पश्वादि नीतकस्तीर्थकारकः परवीरहा नानागुणयुतःसोपिवक्तुं
मयानशक्यते ८ स एवं वयक्षणात्यंतपीडितः पापरूपिणा अस्थिशेषोभवद्राजा
शोकाकुलोबभूवह ९ नानोपायाः कृतास्तस्य शांतये चनसोभवत् शांतस्तु तो
महाराजस्तीर्थयात्रापरोभवत् १० नानातीर्थानिराजासौचकार भक्तिसंयुतः पीड
यानेवमु क्तोभूत्ततोदुःखितेनसः ११ देवार्चनंविप्रांश्चकारभावयुतः तथापिरोग



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



संयुक्तोराजाधिकोबभूवह १२ ततःशांतिधरोराजावैराग्येनिदधेमनः राज्यंत्यक्त्वा
प्रधानेषुसस्त्रिकःसवनंययौ १३ बभ्रामवनगोभूत्वायत्रतत्रमहीपतिः ततोमंक
णकंविप्रंददर्शयोगिसत्तमं १४ तंदृष्ट्वानिपपातोर्व्यांभूजांरुरोदभूमिपः ततस्तंमुनि
मुख्योसौजगादरूपयायुतः १५ मंकणकउ० राजन्शृणुमहाभागयेनत्वंरोगसंयु
तः बभूवतद्घंसर्वंकथयामिनृपाधम १६ राज्येतेव्रतमुख्यंपत्नीचतुर्थिसंज्ञितं
तेनत्वंपापसंयुक्तोगच्छसिनरकेखलु १७ सर्वादौतद्व्रतंकार्यंनित्यवद्राजसत्तम स
र्वसिद्धिकरंपूर्णंचतुर्विधफलप्रदं १८ तद्व्रतेनविहीनस्त्वंनानाधर्मपरायणः च
तुःपदार्थहीनत्वान्निष्फलोसिनृपाधम १९ एवमुक्त्वाचमाहात्म्यंचतुर्थीसंभवं
मुनिः श्रावयामासतस्मैतच्छ्रुत्वासोपिमब्रवीत् कर्दमनुवाच धन्यंमेजन्मक



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

र्माहि त्वदंघ्रियुगदर्शनात् व्रतस्य श्रवणाद्दन्यत्कृतकृत्योनसंशयः २१ दयानिधे
गणेशस्य स्वरूपं वद विस्तरात् सर्वदेवाधिदेवं तं भक्तिष्यामि रंतरं २२ मंकणकमु नि२
गणेशस्य स्वरूपं पत्कृपितं शंकरेन तत् नयाप्युपाधिसंयुक्तं वदामि शृणु कर्दम २३
सं४ पुराहं पत्रभक्षः सन्तपस्तिष्ठितो भवं बहुकालगते हस्ते विद्धो मे कंटकेन च २४
तदा पत्ररसस्तस्माच्छ्रावकिंचिदपाहो दृष्टा विस्मितचित्तोहं नृत्यं चाकरवं तदा
२५ अहो देवा गुणं कुत्र रुधिरं मेस्वभावजं पत्रभक्षप्रभावेण रसस्त्वयतिहस्तक
२६ ततो नृत्यस्य वेगेन कंपितं सचराचरं मदीयतपसा युक्तं देवाः शंकरमापयुः २७ प३
शंकरः सर्वदेवैश्चागत्य मामब्रवीद्वचः किं नृत्यसि महाभाग पत्रजप्रभे कौतुकं महत्
२८ इत्युक्त्वा चृटिकातेन कृतात्पारसस्य मे भस्मरूपं कृतं भूपतितोति विस्मितो भ

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





वं २९ त्वक्कानत्यं महेशानं प्रणम्यस्तोमितत्क्षणात् अंतर्द्धीयस्वमात्मानं शंकरः स
गतो भवत् ३० मयामनासिराजेंद्र संधृतं शंकरा त्परं विघ्नेनान्यथाकर्तुमकर्तुंक
र्तुमीश्वरः ३१ दर्शयित्वातपं सत्यमतो ज्ञानमकृतं महत् रसगं सर्वगः सोपि ब्रह्माका
रः प्रदृश्यते ३२ त्वक्कविष्णुं महेशस्य ज्ञाने निरतो भवं क्रमेणयोगयुक्तो हंतपश्य
त्वाश्रमेरतः ३३ जडादिकामयायोगभूमयः क्रमिता ततः क्रमेणसंत्रे हेसंस्थो भवं
तमोहवर्जिते ३४ तत्रतत्र महीदेशे भ्रमितो योगधारकः सहजं ब्रह्ममोहेनहीनंद
ष्टं मयातत ३५ स्वाधीनं साहजं ब्रह्म नयोग्यं शां ति देपरे ब्रह्मणिते नभ्रांतोहं सूर्य
स्यशरणं गतः ३६ प्रणम्यसोरमागेणस्तोत्रेणसंस्थितो मया प्रसन्नो मांवदत्तत्रव
रंवरयचेप्सितं ३७ ततोहमवदं सूर्यं वदशांतिप्रदं प्रभो साहजंमोहहीनत्वात्स्वा



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

धानेनैव शांतिदं ३८ ततो मामब्रवीत्सर्पः प्रसन्नो भक्तिपंचितः गणेशं भज भा
वेन तदा शांतिमवाप्स्यसि ३९ असच्छक्तिश्च सत्सर्पः समो विघ्नुर्महामुने सहजः
शंकरः प्रोक्तस्तेषां योगगणेश्वरः ४० चतुर्णां चैव योगेन तस्यानंदः परिकीर्तितः अ
योगः पंचभिर्हीनः तत्र निर्मापिकेचभौ ४१ संयोगे माययायुक्ता योगे माया
विवर्जितः तयोर्योगे स शांतिदो गणेशो ब्रह्मनायकः ४२ चित्तरूपा महाबुद्धिः पंच
धापरिकीर्तिता चित्तमोहप्रदा सिद्धिस्ताभ्यां क्रीडति विघ्नयः ४३ चित्तमोहयुतं
विप्रयोगेन त्यज शांतिदं चिंतामणिं भज स्वस्वयोगी वंद्यो भविष्यसि ४४
एवमुक्त्वा ददौ मंत्रं मत्स्यं षडक्षरं प्रभुः सविधेतेन मत्कृत्वा तूष्णीमेव समागमं
४५ तत्र विघ्नेश्वरं भक्त्या भजामि नित्यमादरात् ततः स्वस्मै न शांतिस्तो भवंयो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



गस्यसेवया ४६ तथापि गणराजेंतं पूज्य मंत्र परायणः अ भजंतेनसंतुष्टः प्रत्य
क्षं प्रपयौ स्वयं ४७ मयासंपूजितो भक्त्या स्तुतो नानाविधैः स्तवैः मत्यं दत्वा दृढां भक्ति
मंतर्द्धानं चकार ह ४८ तदारभ्य महीपाल गाणपत्यो ह्यमादरात् भजामि तं गणेशा
नं स्वछंदेन महामते ४९ एवमुक्त्वा ददौ तस्मै कर्दमाय षडक्षरं मंत्रं विधिपूर्वं वि
प्रो गणेशस्य कृपायुक्तः ५० अंतर्द्धानं चकारापि मंकणको महामुनिः राजा ह पस
मायुक्तः स्वर्गं प्रत्यपद्यत ५१ तत्रादौ कार्तिकमासि कृष्णाचतुर्थिका गता तां चक
रपुरस्थे श्च जनैर्हर्षयुतो नृपः ५२ ततो भूपेन विख्यातं कृतं व्रतमनुत्तमं शुक्लकृ
ष्णचतुर्थीजं चक्रुर्व्रतं जना भुवि ५३ रोगहीनः स राजर्षिर भजद्गणनायकं ज
नावंध्यादिहीनाश्च भजंते भावसंयुताः ५४ पुत्रे राज्यं परित्यज्य वनं ययौ सम



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्त्रिकः तत्र विष्णोश्वरं भक्त्या भजद्दनन्यचेतसः ५५ अंते स्वानंदगो भूत्वा ब्रह्मभूतो
बभूवह क्रमेण भूमिसंस्थाप्तब्रह्मभूताबभुविरे ५६ एवं व्रतस्य माहात्म्यं कथितं
तेनृपोत्तम अन्यत्वं शृणु भावेन कार्तिके संभवं परं ५७ चांडालः कोपि पापात्मा
हिंसायांतत्परोभवत् जघान ब्राह्मणानन्यान्जंतून्वनसमाश्रितान् ५८ परस्त्रि
यवने दृष्ट्वा भक्तांहृत्संयुतः एवं नानाविधं पापं चकार दुर्मतिः सदा ५९ क
दाचित्कार्तिके मासि चतुर्थ्यां वनमाश्रितः कृष्णायांतत्र सर्पेण दष्टः पापपराणः
६० ततोतिभयसंयुक्तः स्वगृहं प्रत्यपद्यत तत्रोपायाः कृतानानास्वजनैर्विषहार
काः ६१ तथापि विषबाधा च नजहौ तं सुदुर्मतिं ततश्चंदोदये किंचित्सावधा
नोबभूवह ६२ तत्रान्नं भक्षयित्वा स पुनस्तद्गरलेन च व्याकुलः पतितस्तत्र ग

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



तच्चेष्टोत्पन्नो भवत् ६३ पंचम्यां समृतः पापी ब्रह्मभूतो बभूव ह व्रतपुण्यप्रभा
वेणैनद्भुतमिवाभवत् ६४ एवं नानाविधाजन्मतपुण्यप्रभावतः ब्रह्मभूता
मया वक्तुं शक्यं तेन बभूविरे ६५ एतत्ते कथितं सर्वं माहात्म्यं कार्तिकेन्प संकथ्या
पाः पठति यस्तु शृणोति तस्य भवेत् ६६ इति श्रीमदांतेमोद्भले० च० ग० कार्तिक
मासचतुर्थ्यां माहात्म्यनामैकोनत्रिंशो ध्यायः २९ दृष्टार्थ उवाच मार्गशीर्षे च
कृष्णायाश्चतुर्थ्यां वदमानद माहात्म्यं सर्वदं स्वामिन्पेनतस्तो भवाम्यहं १ वशि
ष्ठ उवाच इतिहासं पुरावृत्तं कथयामि सविस्तरं राजा बभूव तेजस्वी हरिश्चंद्रः
प्रतापवान् २ अयोध्यायां स्थितः सोपि नानाधर्मपरायणः तस्य पुण्येन तु
ल्यं तु न बभूव धरातले ३ सदा सद्गुणसंपुक्तो यज्वा कर्मपरायणः पद्म



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चपते विपस्तत्तद्दा तिहर्षतः ४ ततस्तं छलितं योगी विश्वामित्रः समाययौ सर्वरा
ज्यं नृपस्यैव जग्राह दानमार्गतः ५ राज्यभ्रष्टं नृपं कृत्वा परप्रांते गतं पुनः नानाभि
षेणतंत्रा छलत्सम निसतमः ६ ततः सोपि नृपोत्यंतं धर्मयुक्तो बभूव ह न च चा
लाति दुःखैश्च संयुक्तः परमार्थवित् ७ तत्रैव कदाचन्न पृथ्वीसामागतो कृ
ष्णानृपः क्षुधायुक्तो बभूव तृषायुतः ८ छलितो मुनिना त्यंतं ततश्चंद्रोदयो भ
वत् तत्रान्तं भक्षयामास राजेंद्रो देवयोगतः ९ पंचम्यां बुद्धिसंभेदो विश्वामित्र
स्य चाभवत् तज्ज्ञात्वा विस्मितो योगी पवि चारत्स्वचेतसि १० ततस्तेन व्रतं त
त्र ज्ञातं राज्ञा सुतेमह तत् प्रत्यक्षं वरदो भूत्वा हरिश्चंद्रमवाचह ११ कुरु रा
ज्यं महाबुद्धे शृणु मे परं वचः तव राज्ये च तत्पृथ्वी जंबूतं न शंव भुवह १२ तेन त्वं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



पाडयायुक्तः प्रजातोसिनृपाधम अहंसंक्षुभितोवापितद्दर्पेनात्रसंशयः १२ सर्वाद्दौत
दूतंकर्मचनृपतद्प्रदंनप नित्यवन्नात्रसंदेहः सर्वसिद्धिप्रदापकं १४ त्वयानानावि
धंपुण्यंकृतंविधियुतंमहत् तत्सर्वंनिष्फलंजातंव्रतहीनप्रभावतः १५ जनैःसर्वैर्महा
राजनरकेत्वंप्रपत्स्यसि अधुनाज्ञानतोमुख्यंव्रतंत्वयाकृतंमहत् १६ तेनाहंप्रीति
संयुक्तः कृतोवेराजसत्तम तत्कुरुष्वमहीपालजनैःसौख्यमवाप्स्यसि १७ एवमुक्त्वा
स्मे ६ दद्दौत मंत्रमष्टाक्षरं मुनिः सविधंगणराजस्यसोपितंपुनरब्रवीत् १८ हरिश्चंद्र
गणेशस्यस्वरूपंमेवदसर्वज्ञतेनमः व्रतस्यैवप्रभावंतंविधिंचैकंमहामुने १९ विश्वामि
त्रउवाचगणेश्वरस्यमाहात्म्यंश्रृणुमंक्षेपतोनृप एक एवगणेशोयंसर्वेतस्यगणाः
एकी १ स्मृताः २० मनोवाक्कायैर्विश्वंतद्देवगणनायकं नानाभावसमायुक्तंवक्तुंमयानशा

मु ३

१२०

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्यते २१ मनोवाणिवीहि नंयन्त्रा नाव्रत्यप्रवाचकं गणरूपंतु विज्ञेयंवेदेपमुनिमहीपते
२२ सिद्धिर्भ्रांतिकरिप्रोक्तंबुद्धिर्भ्रांतिप्रदानृप ताभ्यांक्रांतिविहीनाश्चिते चिंतामणि
स्थितिः २३ तंभजस्वविधानेन तदाशांतिमवाप्स्यसि राज्यकर्तापियोगीनांवंघस्त्वं
प्रभविष्यसि २४ चित्तंपंचविधंप्रोक्तंतत्र मोहश्चपंचधा समोहंचित्रमुत्सृज्य
चिंतामणिर्भविष्यसि २५ एवमुक्त्वाव्रतस्यैवमाहात्म्यंमुनिपुंगवः आचचक्षे मासतः
सोमतत्श्चांतर्हितोभवत् २६ विश्वामित्रंगतंज्ञात्वाराजाहर्षसमन्वितः अयोध्या
यांपयोवेगात्प्रधानैरनुमोदितः २७ नागरैःसह यामीचचकाव्रतमुत्तमं शुक्ल
कृष्ण चतुर्थ्यंगणेशभजनेरतः २८ सर्वत्रैवप्रशांतंतद्भूतंचकारहर्षतः भूमि
संस्थाजनाः सर्वेचक्रुर्व्रतंविशेषतः २९ नानेनसदृशं किंचित्सर्वदंव्रतमुत्तमं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



ततो रोगादिभि र्हीनाबभुवुर्हर्षसंयुताः ३० राजा गणपतिं नित्यमभजन्नान्यचेतनः पुत्रे
राज्यं विनिक्षिप्य ययौ वनं च सस्त्रिकः ३१ तत्रैव गणराजं सोभजत्सुतपसा युतः शांतिं प्राप्ता
विशेषेण योगी बभूव पार्थिवः ३२ अंते स्वानंदगो भूत्वा गणेशे लीनतां गतः एवं बलस्य मा
हात्म्यं कथितं ते जनंदन ३३ जनाः सर्वे क्रमेणैव ब्रह्मभूता बभूविरे चतुर्थ्यां व्रतते नैव
पुण्येन परमेण ते ३४ अन्यच्छृणु महीपाल मालवे नगरं महत् कर्णनाम्नी च तत्रासी
द्दैत्यानरविमोहिनी ३५ लोकान्सा हावनैर्मोहयामास तत्क्षणात् नाना जनाः स्वधर्मं
वै त्यक्त्वा भवन्तदात्मकाः ३६ स्वस्त्रियं परित्यज्य तत्रतिष्ठास्तेव भुविरे मद्यमांस
रताः सर्वे कृतास्तया नराधिप ३७ ब्राह्मणादय एवंते भ्रष्टा जाता विशेषतः चौ
र्यादिकर्मसंयुक्ताः किं वक्ष्यामि महामते ३८ कथ्येन परदोषाणां दोषी भवति मानद ।

भावे-४



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तादृशानुसावेस्यापापरूपातिदारुणा ३९ नानाजनैर्युतारजन्तरकेकृतनिश्चया ।
तविरामंचकारापिनराणांमोहनेकदा ४० एकदाज्वरसंयुक्तामार्गशीर्षेबभूवच च
तुर्थ्याकृष्णपक्षेसादाहेनपीडिताभवत् ४१ तत्रतयाजलात्नंनज्वरभयात्यभक्षि
तं चंद्रोदयेचभक्षयापिपथ्यंतंदुलसंभवं ४२ पंचम्यांसामृतातत्रब्रह्मभूताबभूवह
व्रतस्यैवप्रभावेणपतिप्राणांसहायिनी ४३ एवंनानाजनाराजन्ब्रह्मभूताबभूविरे तत्र
तेकतिवैब्रुयांनालंवर्षयुतैरपि ४४ मार्गशीर्षेचतुर्थ्यायन्माहात्म्यंकथितंपरं पठ
नाच्छ्रवणात्सर्वसिद्धिर्भवतिसत्यहो ४५ इतिश्रीमदांतेमोहुत्ते० च० मार्गशीर्षकृष्ण
चतुर्थीमाहात्म्यंनामत्रिंशोध्यायः ३० दशरथउवाच योकृष्णचतुर्थ्यास्तुमा
हात्म्यंवदमोगुरो नतृप्यामिकथांशृण्वन्सर्वसिद्धिकरीपरा १ वशि० ४३० इतिहासं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon





प्रवक्ष्यामि पुरातनभवं महत् राजा वीरसहो नाम बभूव हस्तिनापुरे २ बलवान्नीति
युक्तश्च राज्ञ्यास्त्वपरो भवत् धर्मशीलो वदान्यः समान्यमान नाम ता भूरि ३ नाना
दानरतश्चापि वंध्यदोषपुत्तो भवत् तदर्थं पुत्रसाध्यापदेवसेवापरो भवत् ४ ब्राह्म
णैः पुत्रकामार्थं पुत्रिणामिष्टिमाहरत् तदपि नैव लेभे सपुत्रवंशविवर्द्धनं ५ तीर्थेषु
त्रादिकेष्वनेनानधर्मानकारयत् स्वयं पूजापरो भूत्वानलभे सं चिंतितः ६ ततो निदु
खितो राजा स्वस्त्रा राज्यं वने ययौ सस्त्रीकस्तमसाः सशोकैः पीडितो भवत् ७ महा
वनांतरं गत्वा दुःखशोकसमन्वितः सिंहव्याघ्रादिकान्दृष्ट्वा भयहीनश्चचार ह ८ त
त्राजगाम योगींद्रस्त्रितो नाम महामुनिः तं दृष्ट्वा प्रणनामादौ कृतांजलिः पुरस्थितः ९
तेन पृष्टश्च वाचासौ निर्जं सर्वं महायशाः रुरोद तं महायोगी जगाद करुणायुतः १०



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रितउवाच एऽपेतेनपरा ईलव्रतं नष्टं चतुर्थ्या ज्ञं सर्वसिद्धिकरं पूर्णेतेनवंध्यो
सिनिश्चितं ११ सर्वादौतत्स्वकर्तव्यं चतुर्वर्गफलप्रदं तदाकर्मकृतंसर्वंचतुःपदप्रदं भ
वेत् १२ नाना धर्मपरस्त्वेतेज्ञानात्तेषैवमानद फलहीनप्रभावेण पतिष्यंतिपरोर
वे १३ एवमुक्त्वाचतुर्थ्यास्तु माहात्म्यंमुनिसत्तमः श्रावयामा ससंपूर्णेततस्तमत्र
वीन्नृपः१४ वीरसहउ० गणेश्वरस्यमाहात्म्यंवदमेकरुणानिधे एतादृशंव्रतंयस्य
तंभजिष्यामिनित्यदा १५ त्रितउवाच गणेशस्यस्वरूपंपदुःखनाशंकथंभवे
त्॥ उपाधियुक्तभावेनकथयामिशृणुष्वतत् १६ अहंपुरातपोयुक्तःशापानुग्रहणेश
मः एकोद्वितश्चमेराजन्भावरौविषयायुतौ १७ ताभ्यांयद्वार्थमेवाहंगतोराजामहात्म
नः एकोद्वितश्चमेराजन्भावरौविषयायुतौ १७ ताभ्यांयद्वार्थमेवाहंगतोराजामहात्म
नः अभवंकारं त्वांस्वगृहेगंतुमुत्सुकः १८ दक्षिणापथमिर्युक्तंविपुलैर्मार्गसंछि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



तं भ्रातरौ लोभसंयुक्तौ कुपे क्षिप्त्वा प्रजग्मतुः १७ जलहीनि हि कुपे हं पतितः खेदसंयु
तः तत्र मानसिकं पद्मकरं हि तावहं २० आजग्मुस्तत्र देवा द्याहविर्भागार्थमा
दरात् मया संपूजिताः सर्वे तृप्ताः संहर्षिता बभुः २१ ईप्सितं मे मराः सर्वे वरं ददुर्भ
विष्यति ततः कुपात्त्वमा सर्वे वहि क्षिप्त्वा प्रजं रे २२ ततो हं याचये त्वान्यं नृपं गो
भिः समन्वितः स्वाश्रमं गम्य हर्षेण संस्थितस्तप आचरं २३ ततो नितपसा ज्ञानं
सर्वगं मे भवत्ततः तप स्सञ्चयोगेन भूमिसाधनको भवं २४ जडोन्मत्तपिशाचा
द्या भूमयः साधिता मया अंते ब्रह्मणि गो नि ष्ठं स्वमात्मकेस्व शांतिदे २५ आश्र
मे हर्षयुक्तो हं ततो मुद्गलमागतं योगाद्वेदितं नित्यं तं दृष्ट्वा प्रणतो भवं २६ पूज
यि त्वा सुविश्रांतं पृच्छामि तं कृताञ्जलिः शांतियोगं वद स्वामिन् शांतिभ्यः शांतिदा



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पकं २७ मुकुलनुवा० अस्य शक्तिश्च सत्सूर्यः समोविष्णुर्महामुने अव्यक्तः शंकर
स्तेषां संयोगगणपो भवेत् २८ संयोगो मायया युक्तो गणेशो ब्रह्मनायकः अयोगो माया
हीनो भवति मुनिसत्तम २९ संयोगायोगयोर्योगो योगो गणेशसंज्ञितः शांतिभ्यः शां
तिदः प्रोक्तो भजन्तं भक्तिसंयुतः ३० एवमुक्त्वा गणेशस्य दद्यो मंत्रं समूलः एकाक्ष
रविधयुतं ततः सोंतर्द्धितो भवत ३१ ततो हं गणराजं तं भजे सर्वं भावतः ते नशांतिसम
पुत्रश्च रामित्यकृतो भयः ३२ न गणेशात्परं ब्रह्म न मंत्रात्परं कर्म ज्ञानं न गण
पात्परं ३३ न गणेशात्परं योगो भक्तिर्न गणपात्परा तस्मात्स सर्वपूज्योयं सर्वदो
सिद्धिदायकः ३४ गणेशानं परित्यज्य कर्मज्ञानादिकं चरेत् तत्सर्वं निष्फलं
याति भस्मनि प्रहुतं यथा ३५ सर्वांस्त्यज्य गणेशानं भजन्ते नन्यचेत नः सर्वसि

सरलप्रानगतोपुरा ४५

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



द्विलमेत्स योब्रह्मभूतः सकथ्यते ३६ एवमुक्त्वा चितस्तस्मै ददौ मंत्रं दशाक्षरं विधि
युक्तं ततः साक्षाद्दत्तर्द्धानं चकारह ३७ राजा वीरसहो राजन्हृष्टितः स्वपुरं ययौ
प्रधानैर्नागरैः सर्वैर्मानितः संस्थितो भवत् ३८ तत्रादौ पौषगां कृष्णां सतुथीं तां
समागतां चकार स्वपुरस्थैः सविधिपूर्वं सुहर्षितः ३९ प्रश्नास्तं तद्व्रतं तेन कृतं स
र्वत्र भूमिप सुकृष्णचतुर्थीं जं व्रतं चक्रुर्जनाभुवि ४० ततः पुत्रं महाशूरं
नीतिज्ञं धर्मसंयुतं लेभे नानागुणैर्युक्तं जनाः संहर्षिता बभुः ४१ रोगादिभिर्विनि
र्मुक्ता हृष्टपुष्टाश्च ते भवन् एवं तत्र च जातुथीं जं माहात्म्यमवदन्जनाः ४२
पुत्रे राज्यं समास्थाप्य राजा निर्वृत्तिधारकः सस्त्रिको गणनाथं तमभजद्भावसंयु
तः ४३ अंते ब्रह्ममयः सोपि बभूव व्रतपुण्यतः क्रमेण भुमिसंस्थास्ते ब्रह्मभूता



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वभुविरे ४४ एवंव्रतस्य माहात्म्यं कथितं ते नृपोत्तम अन्यच्छृणु महाभाग पापना
शकरं महत् ४५ गौडे कश्चिद्वणिक् पापी लोभपुक्तो बभूव ह द्रव्यार्थं पितरं सोपि
जघान विषदोषतः ४६ मातरं सतथा दुष्टो मार्गे नालाजनो लथा वणिजो विषयो
गेन मारयामास नित्यदा ४७ एवं बहुधनो जातः परस्त्रीलालसो भवत् मद्यमांसप
रो भूत्वा सतीसंगेषु लालसः ४८ नानाभिषेणादुष्टात्मा सतीर्दूभक्तिवेगतः परस्त्रि
बं-८ यस्तत्तो राज्ञा धृतं स्मृतादितो भवत् ४९ निगडैः दितो दुष्टः संस्थितो राजवेश्मनि।
दैवयोगेन पौषी सा प्राप्ता कृष्ण चतुर्थिका ५० तस्या मन्त्रादिभिर्हीनः स्थितो दुःख
समन्वितः चंद्रोदये रक्षकैर्यं दृतमन्त्रमभक्षयत् ५१ पंचम्यां राजदूतैः स मूले
प्रोतो ममार ह ब्रह्मभूतः सर्वज्ञातो व्रतपुण्यप्रभावतः ५२ एवमज्ञानसंयुक्तज्ञा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



नयुक्तावभुविरे ब्रह्मभूताव्रतस्थेचप्रभावेणमहामते ५३ तत्रैवकलितेराजंकथया
मिविशोषतः नवक्तुंशक्यतेतस्माद्दुक्तंसंक्षेपतोमया ५४ इदंपौषेचसंकृष्यामाहा
त्म्यंसंशृणोतियः पठतिशुभदंतस्यभविष्यतिनिरंतरं ५५ इतिश्रीमहातेमोद्भवेच
गयोषकृष्णचतुर्थीवर्णनंनामैकत्रिंशोध्यायः ३१ दशरथउवाच मलमासेच
संकष्याश्चतुर्थ्यावदमानद माहात्म्यंप्रीतिदंपूर्णंतन्मेदंकृपानिधे १ वशिष्ठ
उवाच आंध्रदेशेमहाराजाबभूवैवतांतरे धर्मदत्तइतिख्यातोनानाधर्मपरायणः
२ पञ्चविंशतिकोत्पंतंनातिशोखिलतोषकृत् षष्टिशाग्राहकःसोपिप्रजापा
लनतत्परः ३ जलोदरयुतोकस्माद्भवन्मानदायकः सार्वभौमोतिपापेनग्र
हीतःसर्वशास्त्रवित् ४ नानोपायाःकृतास्तस्यशांतयेनृपसत्तम तथापिरो



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ग निर्मुक्तो न बभूव महीपतिः ५ तुलादानादिकानि समहादानानि पीडितः चकार त
दपि रोगयुक्तो त्यंतं प्रजायते ६ तीर्थानि भ्रममाणो सः चकार विधिसंयुतः देवता
रा धनं राजा नरोगवर्जितो भवत् ७ ततो ति दुःखितो राजा जलेनैवात्मघातनं विषेणाक
र्तुमुद्युक्तो भवन्जनाः सुविह्वलाः ८ ततो कस्मान्महायोगी चाष्टावक्रः समाययौ त
द्देहं नमस्कृत्य पूजयामास बांधवैः ९ भोजितं तं प्रणम्य कृत्वा करपुटं नृपः ध
र्मदत्तनुवाचासौ विनयावनतो भवत् १० धर्मदत्तनु० धन्योस्म्यनुगृहीतोस्मि स
फलो मे भवो भवत् तव दर्शनतो विप्र साक्षाद्योगीश्वरस्य तु ११ आत्मघातेहमुद्यु
क्तं त्वत्तेदर्शनं महत् प्राप्तं पुण्यसमूहेन नरकं न भविष्यति १२ वसिष्ठ उवाच एवं
वदंयुक्तो योगींद्रसत्तमः उवाच तं महाराजं दयया करुणानिधिः १३ अष्टावक्र०

४ तमानंद

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



किमर्थं देहघातस्त्वमुद्घोतोसि महामते रोगदुःखविनिर्मुक्तो भविष्यसि न संशयः
१४ तवराज्यं महीपाल चतुर्थं व्रतमुत्तमं नष्टं तेन महोग्रेण पापेन संयुक्तो भवान्
१५ राज्ञा राष्ट्रकृतं पापं त्वया प्राप्तं तथैव तत् त्वमपि व्रतसंहीनः पतितोसि न पाध
म १६ सर्वहीनं कृतं कार्यं चतुर्वर्गफलप्रदं तद्राज्यं कर्मकृतं राजन्फलपुष्पं भवेत्किल
१७ त्वया धर्मयुतं कर्म कृतं नानाविधं तथा चतुःपदार्थहीनं तज्जनैः कृतं बभूव
ह १८ सर्वैः सहजनैराजन्नरके त्वं पतिष्यसि तदर्थं व्रतराजं तत्कुरु सर्वसमन्वि
तः १९ एवमुक्त्वा चतुर्थार्थं यन्माहात्म्यं मुनिसत्तमः श्रावयामास तस्मै स करुणा
युतचेतसा २० श्रुत्वा माहात्म्यमुत्तमं स धर्मदत्तः सुविस्मितः उवाच तं हि योगींद्रं
हर्षयुक्तेनचेतसा २१ धर्मदत्त उ॰ पूर्वपुण्यं महन्मे स्ति कथितं तेन वाक्यतः तेने



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गनिर्मुक्तो नबभूव महीपतिः ५ तुलादानादिकानि समहादानानि पीडितः चकार त
दपि रोगमुक्तो त्यंतं प्रजापते ६ तीर्थानि भ्रममाणैः स चकार विधिसंयुतः देवता
राधनं राजा नरोगवर्जितो भवत् ७ ततोतिदुःखितो राजा जलेनैवात्मघातनं विषेणाक
र्तुमुद्युक्तो भवन्नजनाः सुविह्वलाः ८ ततो कस्मान्महायोगी चाष्टावक्रः समाययौ त
द्देहं तं नमस्कृत्य पूजयामास बांधवैः ९ भोजितं तं प्रणम्यैव कृत्वा करपुटं नृपः ध
र्मदत्त उवाच सो विनयावनतो भवत् १० धर्मदत्त उ० धन्योस्म्यनुगृहीतोस्मि स
फलो मे भवो भवत् तव दर्शनतो विप्र साक्षाद्योगी स्वरस्यतु ११ आत्मघातेहमुद्यु
क्तं त्वत्तो दर्शनं महत् प्राप्तं पुण्यसमूहेन नरकं न भविष्यति १२ वसिष्ठ उवाच एवं
वदन्नुक्तो योगींद्रसत्तमः उवाच तं महा[illegible]ड्दयपाकरणानिधिः १३ अष्टावक्र०

× तमानंद

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दृग्व्रतं विप्र श्रुतं मया महाद्भुतं २२ अधुना विघ्नराजस्य स्वरूपं मेदयानिधे कथयस्व स
दृष्टेषु भजिष्यामि महाप्रभुं २३ नरमान्यं च रिक्तं तस्य देवा पस्यपत पस्य दृग्व्रतम् धि-
स्वं सर्वसि द्धिप्रदं भवेत् २४ अष्टावक्र उ० धर्मदत्त महाभाग शृणु त्वं गणपस्य प
त स्वरूपं कथयिष्यामि योगशांतिमदायकं २५ निर्गुणं गजवाच्यं पद्मह्म मस्तकं वच
त स्य सगुणं कं ब्रह्म देहो योगगजाननः २६ सिद्धिर्भ्रांति स्वरूपा सा बुद्धिर्भ्रांति धरा
भवत् ताभ्यां क्रीडति विघ्नेशो माया भ्यां परमार्थतः २७ स्वसंवेद्येन योगेन लभ्यते दर्शनं
महत् तेन स्वानंदवासी स कथ्यते योगीभिः प्रभुः २८ संयोगे यंगकारस्तो योगो णकार
वाचकः तयोः स्वामी गणेशानं शांति योगेन लभ्यते २९ पंचधा चित्तवृत्तिर्यात स्यां
मोहरूपं च धा स मोहं चित्तमुत्सृज्य लभ्यते चित्तचालकः ३० तं भजस्व महाभा

* तेनायं गणनाथस्तु चिंतामणिरिति स्मृतः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



गतदारांतो भविष्यसि ३१ एवमुक्त्वा ददौ तस्मै मंत्रं मालात्मकं प्रभुः सविधं धर्म
दृत्तापत्ततः सोऽतिहृष्टो भवत् ३२ राजापि हर्षसंपूर्णो बभूवातितरांततः धन्यमात्मा
नमेवं समन्यते भाग्यगौरवात् ३३ तत्रादौ मलमासे पाचतुर्थीहमपक्षगां समा
गतोजनैराज्ञातांचकार विधानवित् ३४ ततस्तेनव्रतेमुख्यंसर्वत्र संप्रकाशितं त
तोजनाव्रतंचक्रुर्भूमिस्थापत्रतत्रते ३५ ततोरोगविनिर्मुक्तो धर्मदत्तो बभूवह
जनाःसर्वेतथाहृष्टाबभूवुरोगवर्जिताः ३६ नित्यंगणपतिंराजाहनन्यमानसःग
णेशप्रीतयेनानादानानिसदादौस दा ३७ ततोराज्यंस्वपुत्रेसंस्थाप्यैकांतसंस्थि
तःसस्त्रिकोगणनाथंतमभजद्ध्यानमार्गतः ३८ अंतेजगामविघ्नेशांत नः
सबभूवह जनासर्वेक्रमेणैवब्रह्मभूतावभूविरे ३९ एवंव्रतस्यमाहात्म्यंसर्वे

मजा ४

लीला १२१

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एव२ सिद्धिप्रदावं कथितंतेमहीपाल ध्यै न्यत्वंकथानकं ४० गांधारदेशवासीचक्र
त्रिपः पापकारकः बभुवपद्रव्यस्पहारकश्चौर्यमार्गतः ४१ द्यूतमद्यरतोनित्यंपर
स्त्रिलंपटोभवत् गोमांसभक्षणोसक्तोमिथ्यावाक्साक्षिपूरकः ४२ नानाभेदैः सद
र्वृद्धिःकलहंपत्रतत्रवै चकारसर्वदाराज्ञन्हिंसाकर्मपरायणः ४३ ततोराज्ञामहा
पापीवनेनिष्काशितोबलात् जघानमार्गगांस्तांस्तांडंडैस्तूनानाविधानबलः ४४
द्विजाद्रीणांवधेसक्तःस्त्रीबालवधकारकः एवंनानाविधंपापंचकारनित्यमेवसः
४५ ततोद्रव्यपुतोत्यंतंबकारभोगभुतमं मनेप्सितंसदुष्टात्मानानाचोरसमन्वि
तः ४६ कदाचिन्मलमासेसपर्वतद्रोणिमाश्रितः चतुर्थ्यांकृष्णपक्षस्यहिंसार्थं
लोभसंपुतः ४७ ततःकंमानवंतत्रमार्गस्थंसददर्शह निःसृत्यधावितोत्यंतंशस्त्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



हस्तोवधायवे ४८ सोपितं क्रूरकर्माणं दृष्ट्वा पपात भीतितः क्रोशमात्रं ततोदृष्टः
पपात पादविक्रमात् ४९ पतितं तं समा हृत्य नरः क्रोधसमन्वितः पा
षाणेन माहादृष्टं मारयामास मस्तके. ५० मस्तकस्फुटितस्तत्र क्षत्रियस्य नराधिप
तेन सव्याकुलितोत्यंतं गतश्चेष्टो बभूवह ५१ राजोवाच द्वादशे किं चित्साव धानो भवस्व
पि पाथेयं भक्षयामास स्वल्पं दुःखसमन्वितः ५२ ततो ममार पंचम्यां गतः स्वानंद
कपुरे तत्र दृष्ट्वा गणेशानं ब्रह्मभूतो बभूवसः ५३ एवं व्रतप्रभावेन पापकर्मास
क्षत्रियः ब्रह्मभूतो यमुवापि किं पुनर्ज्ञानतः कृतं ५४ नानाजनाव्रतेनैव भुक्त्वा भो
गान्मनेप्सितान् ब्रह्मभूता बभूवुश्च कथिं तु तन्नरा वते ५५ इदं कृष्णचतुर्थ्यां
पन्माहात्म्यं मलमासगं शृणोति पठति यस्तु सर्वं प्सितमवाप्नुयात् ५६ ॥ इति



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रीमदांतेमौद्गले० च० गमलमौकृस्मचतुर्थेवर्णनंनामसूत्रिंशोध्यायः ३२ द
ग्रारथउ० ग्रामीमुलेचपत्तिष्ठेच्चतुर्थ्यांमुनिसत्तम संकष्टयांतस्यमाहात्म्यंवदमे
करुणायुतः १ वशिष्ठउ० इतिहासंप्रवक्ष्यामिपुरातनभवंनृप सर्वसिद्धिकरंपूर्णं
श्रवणात्पठनान्नृणां २ पांचालेब्राह्मणः कश्चिदृत्रिगोत्रसमुद्भवः पूर्वकर्म
विपाकेनकुष्ठयुक्तोबभूवह ३ नानाक्षतसमाकिर्णः प्रस्रवत्पूयशोणितः कीं
टकैः सर्वतोव्याप्तोत्यंधः कुब्जोभवन्नृपः ४ तंदृष्ट्वातादृशंपुत्रंपितापरमदुःखि
तः अत्रेजेगामशरणंप्रणम्यतंप्रपृच्छसः ५ तेनापिकथितंराजन्ग्रामीमूले
स्थितोभवत चतुर्थ्यां संकटींकुर्यात्तदापापात्प्रमुच्यते ६ ततः सोपिस्वपु
त्रंतंग्रामीमूलेमहिपते समानाप्यबबंधैवदाम्नासर्वार्थसाधकः ७ सूर्यो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



दपात्समारभ्य यावच्चंद्रोदयो भवेत् तावत्तत्रमाहारो गो [illegible] सोऽतिष्ठद्बुध
नाकुलः ८ ततः पित्रा समानीतः स्वगृहे सोऽपि तत्क्षणात् नेत्रयुक्तो बभूवाथ रोगा
दिभिर्विवर्जितः ९ कुब्जनाहीनरूपं तं संस्थितं विगतज्वरं तद्दृष्ट्वा परमाश्चर्यं वि
प्राः सर्वे विस्मिरे १० ततः सोऽपि गणेशानमभजन्नित्यमादरात् चतुर्थ्यां कृष्ण
पक्षे वै गणेशमूले स्थितिष्ठति ११ अंते गणेशसायुज्यो ब्रह्मभूतो बभूव ह एवं स्थ
मूले सस्ताध्यं कुरुते वरं १२ अन्यच्छृणु महीपाल माहात्म्यं सर्वसिद्धिदं चौरः क
श्चिन्महापापी नगरे संगतो भवत् १३ स्कादृष्ट्वा गृहं किंचित्तेन तत्र प्रविष्टवान्।
धनं गृह्य बहिर्यातो दृष्टो नरैः स पालह १४ जनैः कैलालहस्तत्र कृतः परमदारुण
प्रत्वारा हो यपु र्दूता शस्त्रहस्ता महाबलाः १५ ज्ञात्वा वृत्तांतमुग्रंते धाविता क्रोध



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संयुताः वेगेन तं महाचौरं जघ्नुः शस्त्रप्रहारतः १६ छिन्नांगं पतितं चौरं दृष्ट्वा
ध२ स्तं गृह्य दारुणं बबंधुः भीतस्तं ततो राजानमाययुः १७ तत्र कस्माच्चतुर्थ्यां सासमा
गता महीपते कृष्णासोपि महाचौरः भूमौ लग्नस्थितो भवत् १८ पंचम्यां क्षतहीनांगं चौरं सर्वं चरो भवं संजातं राजदूतास्तं ज्ञात्वा राज्ञे न्यवेदयन् १९ राजा तत्र स
मागम्य तं प्रणम्य पुरः स्थितः एतस्मिन्नंतरे तत्र विमानं सहसागतं २० तं गृह्य तत्र निक्षिप्य गणान् मृदंगाविराजितान् तान् प्रणम्य स राजर्षिः पप्रच्छ गंतुमुत्सु
कान् २१ महासेन उ० भो भो गणपते दूताः किमनेन कृतं महत् वदत करुणायु
क्तास्तद्यं करवामहे २२ गणेशा ऊचुः कृष्णपक्षे चतुर्थ्यां यः भूमौ मूले जपेन्मनुं
या१ निष्ठस्तस्यादेर्घावच्चंद्रोदयो भवेत्तथा २३ निराहारः सविघ्नेशं पूजयेद्व्रतकारकः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



प आद्विप्रांश्चसंभोज्यस्वयंभुंजीतवाग्यतः २४ रात्रौजागरणंभक्त्या पंचम्यां
पुजनैः प्रकुर्वीहरणराजंसइप्सितसमवाप्नुयात् २५ सद्यैवफलसंयुक्तोभवतिना
त्रसंशयः अंतेस्कनंदगोभूत्वाब्रह्मभूतःसजायते २६ एवमुक्त्वागतादृत्वाचौरेणस
हितानृप चौरविघ्नेश्वरंदृष्ट्वाब्रह्मभूतोबभूवच २७ ततोराजामाहात्म्यंगणेशा
भजनेरतः चतुर्थ्यांशमीमूलेसोतिष्ठतियमसंयुतः २८ ततोराजागतिंलेभेत्रिलो
कांश्चतपुण्यतः ब्रह्मादीनांसभाग्यंसगत्वातिष्ठतुस्वेच्छया २९ पुनःस्वनगरेरा
जाचंपावत्यांजगामह एवंसर्वत्रगोभूत्वारराजराजमंडले ३० अंतेसर्वजनैरा
जानगरस्थैर्महामते जगामविघ्नराजतंब्रह्मभूतोबभूवह ३१ इदंमाहात्म्यम
स्यंतेशमीमूलस्थगेमहत् चतुर्थ्यांकथितंराजन्संकटयांसर्वसिद्धिदं ३२ यः



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शृणुपात्यदेहूपिससचैवफलमेत् ईप्सितंगणराजस्यप्रसादान्नात्रसंशयः
३३ एवंनानाजनाराजन्धर्मोषादिवर्जिताः बभूवुश्चरितंतेषांवक्तुंमयानशक्यते॥
३४ इतिश्रीमदांत्येमोद्भले०च०गा०रामामूलस्कंधचतुर्थेव्रताचरणमाहात्म्येनाम
त्रयस्त्रिंशोध्यायः ३३ दशरथउ० श्रावणादिषुमासेषुलड्वादिभक्षतेनृपः त
स्यविधिंयुतंविप्रमाहात्म्यंवदसर्वदं १ वशिष्ठउ० मनोर्वैवस्वतस्यैवपुत्रइक्ष्वाकुसं
ज्ञितः राज्यलोभाकनिष्ठः सन्व्रतंचकारसिद्धिदं २ श्रावणे कृष्णसंदेषांवभक्षति क
लजान्नृपः लड्डुकान्सप्रभावेनव्रतसाधनतत्परः ३ दधिभक्षणमात्रंसभाद्र
पदेचकारह आश्विनेनिर्जलेतद्वच्चकारव्रतमुत्तमं ४ कार्तिके दुग्धभुक्राजा
तिष्ठत्वनियमरतः मार्गशीर्षेजलंपीत्वाभजत्तंगणनायकं ५ पौषेगोमूत्रमात्रे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



तुपीत्वाव्रतंसमाचरत् माघेशुक्लेनराजावभ क्षव्रतकारणात् ६ सौम्येनार्क
रापुक्तं घृतंबभक्षमानवः चैत्रेतद्वत्संचरग्यंपूजयित्वाविनायकं ७ वैशाखेपद्मवी
जंसबभक्ष व्रतधारकः ज्येष्ठे घृतंगवांभक्षचकारव्रतमुत्तमं ८ आषाढेमधुमात्रंस
बभक्षनियमेरतः चंद्रोदयेगणेशानंपूजयित्वाविधानतः ९ ततस्तस्य व्रतस्ये
वप्रभावेणमहामतेसुधुम्नोमनुपुत्रोयोऽप्येष इलाभवंनृपः १० ततोमुनिभिराघं
तंराजानंसचकारह मनुरिक्ष्वाकुमेवंनुसार्वभौमंमहाद्युति ११ एवमसाध्यवंश
जन्नि लुप्तियदिमच्चवः धर्ममार्गेण क्षिपितलुप्तेनात्रसंचयः १२ एवंनानाज
नाराजन्व्रतपुण्येनदुर्लभं लब्ध्वातेब्रह्मभूताश्चवभूवुर्भूमिमंडले १३ अ
तस्त्वंराजशार्दूलपापरूपोसिसांप्रतं तवराज्येव्रतंनष्टंनपापमनबुध्यसे १४ १३१

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जनैः सह व्रतं तस्मात् कुरुष्व तं भविष्यसि पुत्रयुक्तश्च विप्रेशमंते गच्छसि निश्चितं
१५ मुद्गल उवाच तं प्रणम्य महाराजो दारयोजगाम ह स्वपुरं जनसंयुक्तश्चका
रव्रतमुत्तमं १६ ततो भूपेन सर्वत्र प्रकाशितं तद्व्रतं कृतं चक्रुः सर्वजना भूमौ व्रतं गणे
श्वरं महत् १७ व्रतपुण्यप्रभावेन चिक्लुः साक्षाद्भूवह चतुर्भुजं तमाभज्य प
त्रस्य महात्मनः १८ रामश्च भरतो राजा लक्ष्मणः शत्रुसूदनः पुत्राश्चत्वार
एवं ते बभूवुर्बलसंयुताः १९ अंते जगाम विप्रेशं दारयः प्रतापवान् लोकादुः
खविहीनाश्च ब्रह्मभूता बभूविरे २० इमं वशिष्ठ विप्रर्षे दारयस्य धीमतः सं
वादं व्रतजं पुण्यं शृणोति पठति नरः २१ तस्मै विप्रेश्वरः साक्षाद्ददाति फलमुत्तमं
पुत्रपौत्रादिसंयुक्तं धनधान्यसमन्वितं २२ नानारोगविहीनत्वमैश्वर्यादिय

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



